सांख्यचंद्रिकाटीकासहितसांख्यकारिका १२५

ॐ श्रीगणेशाय नमः श्रीरामगोविंदसुतीर्थपादकृपाविशेषादुपलब्धबोधं श्रीवासुदेवादधिगतसर्वशास्त्राणि वक्तुं किम
पि स्पृहा नः १ प्रकृतिं चैव नत्वा चार्थान् गुरूंस्तथा नारायणः सांख्यमूले तनुते सांख्यचंद्रिकां २ तदिदं शास्त्रं चतुर्व्यूहं हेयं
हेयसाधनं हानं हानसाधनं चेति मुमुक्षुजिज्ञासिततत्वात् तत्र हेयं सर्वप्रतिकूलवेदनीयतया दुःखं हेयहेतुः प्रकृतिपुरुष
योरविवेकः हानं दुःखस्यात्यंतनिवृत्तिः परमपुमर्थः हानहेतुः प्रकृतिपुरुषविवेकद्वारा शास्त्रं अतोत्र परमपुमर्थस्य स्व
तएवेष्टत्वेन तदुपाये शास्त्रे प्रेक्षावतामिष्टसाधनताज्ञानादवश्यं जिज्ञासा भवतीत्याह दुःखत्रयेत्यादि दुःखत्रयं आ
ध्यात्मिकं आधिभौतिकं आधिदैविकं च तत्रात्मानं शरीरमंतःकरणं वाधिकृत्य यज्जायते तदाध्यात्मिकं दुःखं वातपित्तादि
प्रकोपजन्यं कामादिजन्यं च तत्र भूतानि प्राणिनोऽधिकृत्य यज्जायते तदाधिभौतिकं व्याघ्रचोराद्युत्थं एवं देवानग्न्यादीनधि
कृतं कृत्य यज्जायते तदाधिदैविकं दाहशीतवातादिकं यक्षराक्षसविनायकग्रहाद्यावेशनिबंधनं च यद्यपि सर्वमेव दुःखं मानसमे

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ दृष्टे साऽपार्था चेन्नैकांतात्यंततोऽभावात् १

व तथापि मनोमात्रजन्यत्वाजन्यत्वाभ्यां मानसत्वामानसत्वविभागः तस्य दुःखत्रयस्याभिघातात् असह्यसंबंधात् तदप
घातके प्रकृतिपुरुषविवेकद्वारा दुःखोच्छेदके हेतौ वक्ष्यमाणशास्त्रे प्रेक्षावतां जिज्ञासा भवत्येवेत्यर्थः यद्यपि वर्त्तमानस्थू
लं दुःखं द्वितीयक्षणे स्वयमेव नश्यतीति अतीतं तु नष्टमेव तथाप्यनागतसूक्ष्मदुःखनिवृत्तौ तात्पर्यं अत्र यद्यपि सत्कार्यवादे
न ध्वंसप्रागभावरूपाभावस्तथापि निवृत्तिरत्र सूक्ष्मरूपस्यातीतावस्थत्वं स्थूलस्वरूपाप्राप्तियोग्यत्वं वा न चानागतेऽमा
नाभावः यावच्चितकालावस्थायिकार्यजननशक्त्या यावच्चितसत्त्वमनागतदुःखानुमानात् ननु तत्र शरीरे दुःखस्य रसाय
नादिसेवनात् मानसस्य मनोज्ञस्त्रीभोजनादिना आधिभौतिकस्य नीतिशास्त्राभ्यासनिरत्ययावस्थानसेवनादिना आधिदैविक
स्य मणिमंत्रौषध्यादितो दृष्टोपायादेवोच्छेदो भविष्यतीत्याशयेनाशंकते दृष्टे सति दृष्टे प्रसिद्धौषधादिविषय एव सा जिज्ञासा

अपार्था अन्यथासिद्धत्वादिति चेदित्यर्थः निषेधयति नेति
एकांतत्वं दुःखोच्छेदस्यावश्यकत्वं अत्यंतत्वं दुःखस्य पुनरनु
त्पादस्तदुभयस्य दृष्टोपायादभावात् १ ॥ ॥ ॥

ननु स्वर्गस्यादुःखासंभिन्नत्वादयस्तत्वान्वतद्धेतुज्योतिष्टोमादिकरणं च जिज्ञासा भविष्यतीति तत्राह दृष्टवदिति गुरुमुखादनुश्रू
यत इत्यनुश्रवो वेदः कर्मकांडरूपस्तेन प्रोक्तो ज्योतिष्टोमादिरानुश्रविक उपायो दृष्टवत् औषधादिवत् अत्र हेतुमाह स
ह्यतिहि यतः अविशुद्धिः अंग वैगुण्यं न हिंस्यादिति शास्त्र निषिद्ध [illegible] हिंसा च अंततोऽवहेपत्रादिहृदर्शनं अग्निसोमीय धात
दृष्ट जन्तुनाशादेश्च संभवात् अतो दुःखहेतुरेव क्षयेति तत्कर्मणः क्षयित्वेन नात्यन्त दुःखोच्छेदकत्वं क्षयानंतरं दुःखासत्ते
रित्यर्थः अतिशयेति तत्राप्यधिकसुखित्वदर्शनात् ईर्ष्यामर्षाभ्यां स्वीयो दुःखात्कर्षेण्वातिशय इत्यर्थः ननु विधिसंस्पर्शस्य २५
निषधाविषयतया विरुद्धत्वात् अन्यथा विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषप्रसंगाद् आहवनीयविधिः यद् हा
मस्मिन्न हिंस्यादित्यादि निषेधोऽग्नीषोमीयं पशुमालभेतेत्यादि विधिविषयं यागीयहिंसा परिहृत्य वर्त्तत इति यागीयातिरिक्त
हिंसैव पापं न यागीयेति चेन्न हिंसायां विधिस्पर्शी नेष्टसाधनत्वस्य निषेधाधीनानिष्टसाधनत्वस्य च समावेशासंभवात्स्य
शुद्ध प्रयुक्तस्यात्मानिष्टस्यावित्तश्चयायासादिसाध्य दुःखस्येवाभ्युपगमेन क्रतुसाध्यमहाफलार्पितया प्रकृत उपर्य न१
दृष्टवदानुश्रविकः स ह्यविशुद्धिः क्षयातिशययुक्तः तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् २
त्वेन विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषाणामनवकाशात् पापमेव हिंसाधातुपदवाच्यायागीयापि हिंसेतित दु
ष्टितं ज्योतिष्टोमादिकमविशुद्धमेव अत एवोक्तं मोक्षधर्मे पितापुत्रसंवादे तातैतद्दुःखाभ्यस्तं जन्मजन्मांतरेष्वपि त्रपीध
र्मोधं न सम्यक् प्रतिभातिमे इति अधिकमस्माभिस्तत्त्वयोगसूत्रव्याख्यानेनुसंधेयं तद्विपरीतः श्रेयान् दृष्टानुश्रविकाद्भि
न्न उपायः शास्त्रैकगम्यात्मसाक्षात्कारः श्रेयान् एकांतात्यंतिक दुःखोच्छेदक्षमः सकस्माद्भवति तदाह व्यक्तेत्यादि व्यक्तं
महदादि अव्यक्तं प्रधानं ज्ञः पुरुषः एषां विविच्य ज्ञानाद्भवतीत्यर्थः अयमभिप्रायः आत्मानात्मविवेकसाक्षात्कारात्कर्त
त्वाद्यखिलाभिमाननिवृत्त्या तत्कार्यरागद्वेषधर्माधर्माद्यनुत्पादात् सर्वेषां कर्मणां चाविद्यारागादि सहकार्युच्छेद
रूपदाहेन विपाकानारम्भकत्वात् प्रारब्धसमाप्त्यनंतरं पुनर्जन्माभावेन त्रिविध दुःखात्यंतनिवृत्तिरूपो मोक्षो भवतीति
तादृशसाक्षात्कारहेतोर्मननाख्यविचाररूपे शास्त्रे प्रेक्षावतां जिज्ञासा भवत्येवेति ॥ २ ॥ ॥ ॥ ॥ ॥

व्यक्ताव्यक्तज्ञानां स्वरूपं दर्शयितुं लक्षणमाह मूलप्रकृतिरिति मूलप्रकृतिः सर्वजनिका प्रकृतिरविकृतिरजन्या तथा
चाजन्यत्वे सति जनकत्वं अव्यक्तमुक्तम्। व्यक्तं द्विविधमाह महदाद्याः महत्त्वाहंकारपंचतन्मात्राणि प्रकृतिविकृतयः त
त्त्वविभाजकोपाध्यवच्छिन्नजनकत्वे सति जन्यत्वं इत्यर्थः षोडशकस्तु एकादशेन्द्रियाणि पंचाकाशादीनि महाभूता
नि च विकार इति तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वे सति जन्यत्वं इत्यर्थः पुरुषस्तु सर्वभोक्ता न प्रकृतिर्न विकृतिः
अजनकत्वे सति अजन्यत्वं इत्यर्थः आद्यविशेषणेन प्रकृतेर्निरासः द्वितीयेनातीन्द्रियसामान्यादिनिरासः तदेवं पंच
तु ई विंशतितत्त्वान्युक्तानि सेश्वरसांख्यनये पुरुषपदेनेश्वरस्यापि ग्रहणं मायापदेन चेश्वर एवोच्यते जीवाद्दष्टं वा संकल्प ई
त्वा १ अविद्याशब्देन जीवस्य भ्रम एवोच्यते नान्यत् अतो न तदुकथनं न्यूनं एतेनेति संक्षेपः ३ तत्त्वान्युक्तानि तेषां सिद्धिः

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ३
दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ४ ॥ ॥

प्रमाणेन भवति न चैकप्रमाणेन सर्वेषां तत्त्वानां सिद्धिः संभवति तथा च प्रमाणबहुत्वमुचितं तत्र कानि प्रमाणानि कियं चि १
ति वेत्यत आह दृष्टमिति दृष्टं प्रत्यक्षं अनुमानमनुमितिकरणं लिंगपरामर्शः आप्तवचनं शब्दप्रमाणं युक्तं कपिले
न भगवतेत्यर्थः कुतः सर्वप्रमाणसिद्धत्वात् सर्वैः प्रमाणैः प्रमातृभिः पतंजलप्रभृतिभिः सिद्धत्वात् प्रत्यक्षानुमानाग
न५ माः प्रमाणानीति स्वीकृतत्वात् उपमानादिकं तु सर्वप्रमाणसिद्धमिति भावः यद्यपि वैशेषिकैः शब्दो नाभ्युपेयते तथा २
पि तेन न प्रमाणतारहितभावः एवमन्येपि प्रत्यक्षाद्यपलयं तेन प्रमातार इति बोध्यं उपमानं सांख्यतैर्भिकयथा गवयप
दं गवयवाचकं असति वृत्यंतरे तत्र प्रयुज्यमानत्वादिति एवमर्थापत्तेरपि यथा पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र रा
त्रिभोजी दिवाभुंजानत्वे सति पीनत्वादिति अनुपलब्धिस्तु प्रत्यक्षसहकारिणी न स्वतोमानं ऐतिह्यासंभवावपि श
ब्द एव । चेष्टा च अनुमान एवेति संक्षेपः प्रमेयेति हि यतः प्रमाणादेव प्रमेयाणां सिद्धिरतः प्रमाणत्रैविध्यमिष्टमिति ४॥ २

प्रतिविषयेति १

प्रमाणानां लक्षणमाह प्रतिविषयो निर्दिष्ट विषयोऽध्यवसीयते निश्चीयतेऽनेनेति प्रतिविषयाध्यवसाय इंद्रियं चक्षुरादीनां रूपादि
ज्ञानेन २ विषयकत्वनियमान्नियतविषयकत्वं ननु कारणेन मेघादिना कार्यस्य वृष्ट्यादेर्ज्ञानं कार्येण धूमादिना कारणस्य वह्न्यादेर्ज्ञा
नेन नष्टप्रयत्ने तथा च तत्केन प्रमाणेन जनयितव्यं तत्राह त्रिविधमिति तथा चानुमान एव तयोः प्रवेशः तथा च गौतमसूत्रं अथ तत्
पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति तत्पूर्वकं आप्तादिप्रत्यय पूर्वकं पूर्ववत्कारणेन कार्यानुमानं
शेषवत् कार्येण कारणानुमानं सामान्यतो दृष्टं कार्यकारणान्यलिंगकं यथा वायूपनीत चंपकभागो रूपादिमान् गंधादिति त्रित
यसाधारणमनुमानलक्षणमाह तल्लिंगेति तस्य साध्यस्य लिंगं व्याप्यं लिंगं यत्र विद्यते स लिंगी व्याप्य वान्पक्षः पूर्वं कारणं
यस्य प्रत्ययस्य तत्तथा तथा च साध्यव्याप्यविशिष्टपक्षप्रत्यक्षं वह्निव्याप्यधूमवान्पर्वतः इत्याद्याकारः परामर्शोऽनुमानमनुमि
तिकरणत्वादित्यर्थः शब्दलक्षणमनुमाह आप्तवचनमिति आप्तं चतद्वचनं चेत्याप्तवचनं आकांक्षायोग्यतासन्निधिमत्प
यवत्पदकदंबकं लक्ष्यनिर्देशोऽयं आप्तश्रुतिर्लक्षणं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः श्रूयतेऽस्मादिति श्रुतिर्वाक्यं तथा

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं तल्लिंगलिंगिपूर्वकमाप्तश्रुतिराप्तवचनं च ५॥

कादि १ चाप्तोक्तवाक्यत्वमिति लक्षणं प्राप्तम् शुकवालवाक्ये यथार्थवाक्येतु सेश्वरसांख्यमते ईश्वर एवाप्तः अन्यमतेतु तन्न प्रमाणं निरीश्वरसांख्यमते १
मितिसंक्षेपः वस्तुतस्तु लभ्यते इंद्रियादिकं न प्रमाणं किंतु इंद्रियादिजन्यवृत्तिरेव तथाहि अविसंवादिज्ञानमनधिगततत्व
बोधो च प्रमा तत्करणं तस्याः अप्रयोगव्यवच्छेदनसंबंधि तदेव प्रमाणसामान्यलक्षणं तत्रेंद्रियसंचारमार्गेण बाह्यवस्तुसंब
धाच्चित्तस्येंद्रियसन्निकृष्टार्थविषयावधारणप्रधाना वृत्तिः प्रत्यक्षं यथा घटोऽयमित्यादि गृहीतव्याप्तिकेन हेतुना सध्याव
तिपक्षे ज्ञायमाने न साध्यविषया वृत्तिरनुमानं यथा पर्वतो वह्निमानित्यादि आप्तोक्तेन शब्देन श्रोतुस्तत्तदर्थाकारा वृत्तिराग
मः यथा स्वर्गकामो यजेतेति वाक्यात्स्वर्गकामनावता यागः कार्य इति अत्र सर्वत्र पौरुषो बोधः फलं येन जानामीत्यादिव्यवहा
रतिजनः इत्यास्तां विस्तरः कारिकार्थस्तु प्रतिविषयोऽध्यवसीयते निश्चीयते विषयीक्रियतेऽनेनेतींद्रियवृत्तिरूपज्ञानं प्रत्यक्षं
लिंगलिंगिपूर्वकं स्वज्ञानद्वारा हेतुपक्षजन्यं साध्यज्ञानमनुमानं आप्तश्रुति आप्तेन शब्देन शाब्दबोध इति ॥ ५ ॥ ॥

इदानीं प्रमाणविषयानाह सामान्यतस्त्विति समान्यत इति षष्ठ्यंतात्तसिः तथा चेंद्रिययोग्यस्य सर्वस्यापेक्षितस्यानपेक्षितस्य च
दृष्टात्प्रत्यक्षादेव सिद्धिः तेन पृथिव्यादीनां प्रत्यक्षादेव सिद्धिरिति भावः अतींद्रियाणां प्रकृत्यादीनां सिद्धिरनुमानात् यथा महत्
अनुमानादपि ४ तत्त्वं सकारणकं कार्यत्वात् घटवदिति कारणांतरबाधात्प्रकृतिसिद्धिः न च पुरुष एव जनकोऽस्तु तस्यापरिणामित्वेनाजनक
त्वात् तस्मादपि परोक्षं अतींद्रियं यागस्वर्गसाधनत्वादिति आप्तागमात् शब्दप्रमाणादित्यर्थः ६ ननु प्रकृत्यादौ प्रत्यक्षमे
व कथं न प्रवर्तते इत्याशंक्यायं प्रत्यक्षविघटकानि हेतूनाह अतिदूरादिति प्रत्यक्षं न प्रवर्तत इति शेषः अत्यर्थं गतः पक्षी न
दृश्यते दूरत्वदोषात् दोषस्य कचित्कस्यैव अन्यथा सूर्यादिमंडलदर्शनं न स्यादिति चक्षुर्गोलकगतः कज्जलादिः इति सामी
प्यान्न दृश्यते अत्राप्यतिपदस्यान्वयः इंद्रियगोलकं तस्य घातान्नाशात् मनोनवस्थानात् व्यासंगेन तदिंद्रियसंयोगाभावा
त् सौक्ष्म्यादिंद्रियायोग्यत्वात् व्यवधानात् कुड्यादेः अभिभवो बलवत्सजातीयसंबंधः यथा सौरालोकाभिभवाच्चंद्रप्रभा न गृ

सामान्यतस्तु दृष्टादतींद्रियाणां प्रतीतिरनुमानात् तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं ६
अतिदूरात्सामीप्यादिंद्रियघातान्मनोनवस्थानात् सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ७
सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ८

ह्यते समानाभिहारः समगुणानामिश्रणं यथा माहिषादिदुग्धे गव्यदुग्धं न गृह्यते ७ नन्वेषामन्यतराधीनः प्रत्यक्षाभाव इति
प्रत्यक्षाभावः २ न वक्तव्यं मतं तन्न युक्तं प्रकृत्यादीनामभावनिबंधन एव संभविष्यतीत्यत्राह सौक्ष्म्यादिति सौक्ष्म्यान्निरवयवद्रव्यत्वेनेंद्रियायो
ग्यत्वात् तेषां प्रकृत्यादीनामभावः किं कार्यं तत्राह महदादीति आदिपदात् अहंकारपंचतन्मात्राणि गगनादयश्च तत्र सरूपम
हत्त्वादि सत्त्वकं तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वात् विरूपं गगनादि तादृशाजनकत्वात् एतत्कथनं कार्याणां विवेकज्ञाना
य सारासाराविवेकेनात्मतत्त्वज्ञानजिज्ञासाद्वारा साधर्म्यवैधर्म्यप्रकारककार्यतत्त्वज्ञानस्य कैवल्योपयोगित्वादिति तच्च स्फुटं
भविष्यति ॥ ८ ॥ नुपलंभो न प्रकृत्याद्यभावात् कुतः कार्यतस्तदुपलब्धेः कार्येण तेषां सिद्धेः कार्यलिंगक ३
तदनुमानस्याबाधितत्वादिति ॥ ३

कार्यमसत्पनंतरमपि २

कारणस्य २

ननु तार्किकनयेसतोसज्जायते तथा च यावत्कार्यं न जातं तावत्पर्यंतं कारणस्य प्रमाणाभावेनासत्वापत्तिः तथा च कथं पश्चादपि सत्वं स्यात् नहि कार्यमसतः सत्वं कर्तुं तत्राह असदिति कार्यं कारणव्यापारात्प्रागपि सदेव न तु तदानीमसत् असत्वे हेतुमाह असदकरणात् असतो नरशृंगतुल्यस्य प्रागविद्यमानस्योपादानासंभवात् अन्यथा नरशृंगस्यापि विकारापत्तेः असत्वाविशेषात् हेत्वंतरमाह उपादानेग्रहणं उपादानं समवायिकारणं तस्य कार्येणाग्रहणात् यथा दध्यर्थी क्षीरमुपादत्ते नान्यत् यदि वासत्कार्यं स्यात् तर्हि दध्यर्थी उदकमपि गृह्णीयात् न च गृह्णाति तस्मादुपादानग्रहणादवगम्यते कारणे कार्यमस्तीति हेत्वंतरमाह सर्वसंभवाभावात् लोके सर्वमभिमतं तदेव तस्माज्जायते इति कुशकाशादिभ्यः एव घटादिदर्शनात् यदि वासत्कार्यं स्यात् तदा तत्सर्वं सर्वत्र संभवेत् असत्वाविशेषात् न च यत्र यस्य प्रागभावोस्ति स एव तत्र जायते इति वाच्यं तंतुसादृशायां पटप्रागभावः कुत्र स्यात् न च काल इति वाच्यं प्रागभावस्य क्रियाविरहेण ततो वा समनंतरविरहे तंतुवृत्तित्वं न स्यात् न चाधिकरणतं तद्रूप एव पटप्रागभावस्तद्धधिकरणत्वाविशेषात् घटादिप्रागभावरूपत्वापि स्यात् न च पटनिरूपितकारणतां नियामकं असतः पटादेर्निरूपकत्वादिधर्मासंभवात् सदसतोरसंबंधात् निरूपकत्वादेर्निरूपकस्वरूपत्वेतु तद्दोषतादवस्थ्यं कारणे कार्यसत्ताया तन्निरूपितकारणतायं घेवनान्यत्रेति नियामकाभावादित्याद्यन्यत्र

असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥९॥

विस्तरः हेत्वंतरमाह शक्तस्य शक्यकरणादिति कार्यशक्तिमत्वमेवोपादानत्वं अन्यस्य दुर्वचत्वात् शक्तिश्च कार्यस्यानागतावस्थैव अन्यथा तरत्वेतस्याः कार्यासंबद्धत्वे अवस्थासंबंधत्वेनासत्वासंबंध इति शक्तस्य शक्यकरणादपि सत्कार्यमित्यर्थः हेत्वंतरमाह कारणभावाच्चेति तद्वेदं तर्ह्यव्याकृतमासीदित्यादिश्रुतेरुक्तेः प्रागपि कार्यकारणाभेदस्य श्रवणेन कार्यस्य कारणाभेदस्य श्रवणेन कार्यस्य कारणात्मकत्वादपि सत्कार्यं असत्वे हि सदसतोरभेदानुपपत्तेरित्यर्थः अपि च लोके यदात्मकं कार्यमिति दृष्टं यथा द्रव्येभ्यः कोद्रवा व्रीहिभ्यो व्रीहयो जायंते यदि वासत्कार्यं स्यात्तदा कोद्रवेभ्यो व्रीहीणां व्रीहिभ्यश्च कोद्रवाणां प्रवृत्तिः स्यात् न च दृश्यते तस्मात्कार्यस्य कारणात्मकत्वादपि सत्कार्यमिति न च तर्हि कार्यस्य नित्यत्वप्रसक्त्या सामग्रीवैयर्थ्यप्रसंग इति वाच्यं सामग्र्याः अभिव्यक्त्यर्थत्वात् न चाभिव्यक्तेरपि जन्यत्वे सत्कार्यवादबाधः स्यात् नित्यत्वे सदैवाभिव्यक्तिः स्यात्तस्या अप्यभिव्यक्त्यपेक्षायामनवस्थापत्तिरिति वाच्यं व्यवहारोपयोगित्वेन तत्कार्याभिव्यक्तेस्तत्कार्यनिरूपसत्वगुणरूपतया नित्यत्वेपि तमसा प्रतिबद्धत्वान्न व्यवहारोपयोगित्वं अभिव्यंजकसामग्र्याश्च तेजकेन मणेरिव तमसः प्रतिबंधाद्भाव

हारस्संमतमिति सामग्र्या उत्तेजकत्वमंगीकारात्सत्कार्यवा

दबाधाभावः तस्मात्कार्यकारणयोरभेदेपि व्यवहारस्संमता को

यालमना भिन्नत्वसेवनान्यथा ऽतो न कोपि दोष इत्यास्तां विस्तरः ॥९॥

सां॰ च॰

तत्र पूर्वस्यामार्यायां महदादिकार्यं प्रकृतिविरूपं सरूपं चेत्युक्तं तदिदानीं विशिष्य ज्ञानाय दर्शयति हेतुमदिति व्यक्तं महदादि एषां चैतत्
त्रयोविंशतिसंख्यं हेतुमत् हेतुः कारणं यस्यास्ति अभिव्यक्तं हेतुमत् कदाचिदभिव्यक्तिशीलं अनित्यं कदाचित्तिरोभावशीलं अव्यापि असर्व
गतं विभुत्वे क्रियानस्यात् सक्रियं प्रवेशादिक्रियावत् बुद्ध्यादयो हि एकं देहं त्यक्त्वा देहान्तरं प्रविशन्ति अनेकं प्रतिपुरुषं भेदात् सजातीय
भेदवत् तत्त्वं चात्र स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणतत्त्वविभाजकोपाधिमत्त्वं यातिवेदं महदादिषु महदादिप्रतियो
गिकान्योन्याभावेन महदहंकारो महत्त्वादेः समानाधिकरणत्वात् प्रकृतौ तु न याति प्रकृत्यन्योन्याभावस्य प्रकृतावसत्त्वात् पुरु
षसत्त्वेपि तत्र प्रकृतित्वाभावात् पुरुषे तिव्याप्तिवारणाय तु त्रिगुणत्वे सतीति विशेषणीयं अथवा नेकत्वं सजातीयभेदे न भिन्नत्वं सजातीय
साधारणाभाववदिति यावत् तेन नात्र जातिव्याप्तिः आश्रितं व्यक्तिमत् यथा महत्तत्त्वं प्रधानेन अहंकारो बुद्ध्या पंचतन्मात्राण्यहंकारे
भूतानि तन्मात्रेषु एवं यथासंभवमूह्यं लिंगं लिंगयति ज्ञापयतीति लिंगं अनुमापकं भवति हि कार्यमिदं कारणस्याव्यक्तस्यानुमिति
जनकं भोग्यत्वाद्व्यक्तं पुरुषस्य चानुमितिजनकं सावयवं अवयवैः गुणैर्युक्तं परतंत्रं साक्षात्परंपरया वा प्रकृत्यधीनस्वरूपपरिणामं

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं सावयवं परतंत्रं व्यक्तं विपरीतमव्यक्तम् १०

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ११

कं भवति एतद्धर्म्म प्रकृतावाह विपरीतमिति अव्यक्तं प्रकृतिः विपरीतं हेतुमत्कारणाविश्रांतेस्तत्त्वे वांगीकारात् नित्यं अनुत्पत्तिधर्मि
कत्वात् व्यापि सर्वगतत्वात् निष्क्रियं शांतादिक्रियाशून्यत्वात् एकं सजातीयभेदशून्यं निराश्रितं कारणशून्यत्वात् अलिंगं कारणान
नुमापकं तेनास्य पुरुषानुमापकत्वेपि न हानिः निरवयवं अकारणकत्वात् स्वतंत्रं कार्ये स्वयं समर्थत्वात् पद्यते तेषु धर्माः पुरुषस्यापि तथापि
गुणत्वे सतीति विशेषणीयं तेन न तत्र जातिव्याप्तिरिति संक्षेपः १० एवं व्यक्ताव्यक्तयोर्वैरूप्यमुक्त्वा सारूप्यमाह त्रिगुणमिति व्यक्तं महदादि त
था प्रधानं प्रकृतिः त्रिगुणं सत्त्वरजस्तमांसि त्रयो गुणाः यस्य तु त्रिगुणं तत्र प्रकृतेर्गुणत्रयसाम्यावस्थारूपत्वात् महदादेश्च प्रकृतिकार्यत्वे
न गुणसंबंधात् अविवेकि प्रकृत्यभिन्नं तत्र महदादेः प्रकृत्यभिन्नत्वं कार्यकारणयोरभेदात् प्रकृतेस्तु स्वत एव विषयः ज्ञानभिन्नः ननु
योगाचारमतं तद्ज्ञानाकारः तथा सति एकस्य बहुभोज्यता न स्यात् ज्ञानस्य तदीयस्यैतत्तत्पुरुषमात्रवेद्यत्वात् सामान्यं गुणत्वेन तुल्यं अथवा
भोज्यत्वेन सर्वपुरुषाणां पण्यस्त्रीवत्तुल्यं अचेतनं स्वप्रकाशचेतनाद्भिन्नं अनवभासकत्वात् प्रसवधर्मि प्रसवोन्याविर्भावहेतुत्वं धर्मोयं

त्रिगुणमित्युक्तं तत्र त्रिगुणात्मकाः गुणाः किमर्थाः किंप्रकृतयश्च तत्राह प्रीत्यप्रीतीति गुणाः सत्त्वरजस्तमांसि यथासंख्यं प्रीत्यादिरूपाः तत्र
प्रीतिः सुखं उपलक्षणं आर्जवमार्दवह्रीश्रद्धाक्षमानुकंपाज्ञानादीनां अप्रीतिः दुःखं उपलक्षणं प्रद्वेषद्रोहमत्सरनिंदानिकृत्यादीनां
विषादो मोहः उपलक्षणं विप्रलंभभयनास्तिक्यकौटिल्यकार्पण्याज्ञानादीनां यत्रैतदुपलभ्यते तत्राह गुणाः प्रत्येतव्या इति भावः ल
क्षणमुक्त्वा प्रयोजनमाह प्रकाशेत्यादि प्रकाशावभासः प्रवृत्तिश्चालनं नियमः प्रतिबंधः एषः प्रयोजनं येषां ते तादृशाः तत्रावभासः सत्त्वे
न चालनं रजसा प्रतिबंधस्तमसा तथाहि सत्त्वं रजसा चालितं कार्यं जनयेत् यद्यावरकेन तमसा न नियम्येत तथा च तमसा प्रतिबंधात्त
त्कार्यमुत्पन्नमप्रवृत्तिः अतस्तत्प्रतिबंधः तत्प्रयोजनं बोध्यं अन्योन्येति अत्रान्योन्यपदं वृत्तिपदं चतुर्ष्वप्यन्वेति तथा चान्योन्याभिभववृत्तयः
तथाहि सत्त्वमुत्कटं रजस्तमसी अभिभूय शांतां वृत्तिं लभते एवं रजः सत्त्वतमसी अभिभूय घोरां एवं तमः सत्त्वरजसी अभिभूय मूढां
अन्योन्याश्रयवृत्तयः अन्यतमो गुणः स्वकार्ये अन्यावाश्रित्य सहकारिणौ कृत्वा प्रवर्त्तते अन्योन्यजननवृत्तयः कार्यस्य त्रिगुणा

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः १२
सत्त्वं लघुप्रकाशकमिष्टमुपष्टंभकं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥

त्मकत्वादन्योन्यजनकाः अयमर्थः अन्योन्यामिथुनवृत्तयः स्त्रीपुरुषवदन्योन्यसंयोगशीला इत्यर्थः अत्रायं विशेषः एको यदाधिकस्तदा
अपरौ दुर्बलाविति तथैव दर्शनात् १२ सत्त्वादीनामसाधारणधर्मं विवेकोपयोगायाह सत्त्वं लघ्विति लघु लघुत्ववत् प्रकाशकं इं
द्रियार्थसन्निकर्षे सत्यर्थावभासकं सत्त्वाधिक्ये नैवांगानां लघुतायाः उपलब्धेः इंद्रियाणां विषयग्रहणसामर्थ्यदर्शनाच्च लघु
त्वं प्रकाशकत्वं च सत्त्वस्य लक्षणं तत्र लघुत्वकार्ये इष्टमनेनेत्युक्तो धर्मः इष्टं सांख्याचार्यैः उपष्टंभकं संश्लेषजनकं चलं सत्त्वप्रेरं
जसैव संश्लेषक्रिययोरुपलंभात् प्रेरकत्वं सक्रियत्वं च रजसो लक्षणमिति भावः गुरु गुरुत्ववत् वरणकं आवरकं तमसैवांगगुरु
त्वविषयावभासप्रतिबंधयोर्दर्शनात् गुरुत्वं तदिंद्रियव्यापारनिवृत्तिद्वारा तत्कार्यप्रतिबंधकत्वं च तमोलक्षणमिति भावः
ननु तत्कथमेतेन सत्त्वरजस्तमांसि जात्यंतराण्येवेति लभ्यते तथा च तेषां परस्परविरुद्धानां कथमेकत्र प्रवृत्तिः संभवति परस्पर
विरुद्धानां शत्रूणामेककार्यकरणानुपलंभात्तत्राह प्रदीपवदिति यथा तैलवर्त्तिदीपानां परस्परं विरोधेऽपि तैलवर्त्तिभ्यां सह
दीपः प्रकाशं जनयति तद्वदित्यर्थः दीपोपरि तैलपतनेन दीपनाशात् तैलमपि दीपविरोधि एवं वर्त्तिरपि स्वल्पिकेन दीपनाशकेति १३॥

सां॰चं॰
५

5

अविवेकित्वादिकं प्रकृत्यादिकं साधर्म्यमुक्तं तत्कथं तेषु सिद्धमित्यत आह अविवेक्यादेरिति अत्राविवेक्यादेरिति धर्मपरः अविवेकि
त्वादिकं प्राङ्निरुक्तं महदादिष्ववाधितं कुतः त्रैगुण्यात् प्रकृतिवत्त्रिगुणत्वात् व्यतिरेकसहकारेणैवायमनुमानं सिद्धमिति तान्प्रत्या
ह तद्विपर्ययेति तस्याविवेकित्वस्य विपर्ययो य असत्तद्विपर्यये आत्मनि तत्र त्रैगुण्याभावात् तथा च यत्राविवेकित्वाभावस्तत्र त्रैगु
ण्याभाव आत्मवदिति व्यतिरेकव्याप्तिरस्त्येवातः तत्सिद्धिरप्यवाधितैवेति भावः ननु प्रकृत्यभिन्नत्वं महदादीनामुक्तं प्रकृतिसिद्धि
रेव तु कुतस्तत्राह कार्यस्येति महत्तत्वादीनां कारणाभावे नित्यत्वापत्त्यात्मनो निर्मोक्ष एव स्यादिति जन्यत्वमेवावश्यकं जन्यं च तत्स
मानजातीयगुणकं कारणमेकमेव वाच्यं तथैवानुभावात् कारणं च तन्नित्यमेव तस्यापि कारणस्वीकारेऽनवस्थापत्तिः स्यात् अतो
व्यक्तं प्रधानं अपि नात त्रैगुण्यं च सिद्धमित्यर्थः १४ महदादिभ्यो भेदेन प्रधानं हेतुभिः साधयति भेदानामिति कारणमस्त्यव्यक्तमि
त्युत्तरेणान्वेति त्रिधं ततश्च भेदाः महदादयस्तेषां परिमाणात् परिमितत्वात् अव्यापित्वात् अनेकत्वं रूपभेदवत्वात् वायघटदनेकस

अविवेक्यादेः सिद्धं त्रैगुण्यात्तद्विपर्ययाभावात् कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम् १४
भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥१५॥

व्यापि च तत्तत्कार्यं भवति च महदादिकं प्रतिपुरुषनियतत्वादनेकमव्यापि च अतस्तत्कारणं योग्यतया नित्यमेकं प्रधानमेवेति
भावः हेत्वन्तरमाह समन्वयात् सुखदुःखमोहान्वितत्वरूपसमानधर्मवत्वादित्यर्थः व्यावृत्तानामेषां तत्समानस्वभावैककारणक
त्वमावश्यकं तच्च कारणं योग्यतया प्रधानमेवेति भावः इतश्चास्ति प्रधानमित्याह शक्तितः प्रवृत्तेश्चेति शक्तिमत्वादेव कार्यानु
कूलप्रवृत्तिसंभवात् कारणानां शक्तिश्च प्रकृतिरेवाप्तरिका यतः कार्यं महद्भवति यथा मृदा घटशक्ती जेवत्वादिरिति भावः इतश्चा
स्ति प्रधानमित्याह कारणकार्यविभागादिति कारणे सतः कार्यस्यैव कूर्माङ्गानामिव निःसरणरूपपृथग्भावाद्रूपविभागात् मह
दादिकार्यस्य तादृशतादृशावस्थाहेतुरव्यक्तमेवेति भावः इतश्चापि प्रधानं अविभागाद्वैश्वरूप्यस्य त्रिलोक्याविभागात् प्रलये का
रणेनैकीभावरूपात् लयादित्यर्थः तादृशकारणं विना तेषां भिन्नानामेकीभावरूपो लय एव न स्यादिति भावः न च ब्रह्मैव तादृशकारण
मस्तु कृतं प्रधानेनेति वाच्यं तस्य शक्तिमत्वेन कारणत्वकल्पनापेक्षया शक्तिमत्वेन प्रधानकल्पनाया एवोचितत्वादिति संक्षेपः १५

ननु यद्येकं प्रधानं कथं तर्हि तस्माद्विविधकार्योत्पत्तिः न ह्येकतंतुतः पटो दृश्यते तत्राह कारणमिति यदव्यक्तं जगतः कारणमस्ति तत्त्रिगुणतः
प्रवर्तते सत्वादिगुणत्रयात्प्रवर्तते कार्यं जनयति तथा च गुणत्रयात्मके प्रधाने बहुत्वमस्त्येवातो नानुपपत्तिरिति भावः एकजातीजनक
तात्तत्राह समुदयाच्चेति मेलनाच्चेत्यर्थः गुणत्रयं प्रधानभावेन मिलितं मिश्ररूपमिवैकं कार्यं जनयतीति भावः भवतु महदादि कार्यमेकजा
तीयं कार्यं तिरेषु वैषम्यं तु कुतस्तत्राह प्रतिप्रतीति एकैकगुणाश्रयविशेषस्तस्मादित्यर्थः गुणवैषम्याद्वैषम्यमिति भाव तत्र दृष्टांतः परि
णामतः सलिलवदिति यथा सलिलमेकमपि नारिकेर जंबीरादि परिणामभेदान्मधुरतिक्तादिभावं प्रतिपद्यते तद्वदिदमपि सहकारिभेदा
द्वैषम्यमिति भावः १६ प्रधाने प्रमाणमुक्त्वा पुरुषप्रमाणमाह संघातेति वंच्यमाणपंचहेतुभ्यः पुरुषोऽस्तीत्यन्वयः संघातः प्र
पिंडं तस्य हस्त्यश्वशय्यादिवत्परार्थत्वात् परप्रयोजनार्थत्वात् प्रयोजनं च सुखदुःखान्यतरसाक्षात्काररूपो भोगस्तस्य च जडेवा
धाच्चेतनस्तावत्पुरुषोऽस्तीति युक्तिप्रमाणादिति भावः हेत्वंतरमाह त्रिगुणादिविपर्ययादिति त्रयो गुणा यस्यासौ त्रिगुणादिस्तस्य

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् १६

संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च । १७ ॥

त्रिगुणादेर्विपर्ययोऽभावस्तस्मात् त्रिगुणतत्कार्यस्य जडत्वात्कार्यविशेषकारणत्वाच्च किंचिन्निष्ठाभावप्रतियोगित्वं घटादेरिवावश्य
कं सर्वस्य त्रिगुणस्याभावस्त्वत्रिगुणो पुरुष एव संभवति अतस्त्रिगुणाभावाधिकरणत्वेन पुरुष आवश्यक इति भावः अधिष्ठानादिति
हेत्वंतरमाह अधिष्ठातृत्वात् इत्यर्थः यथा रथः सारथिनाधिष्ठितः प्रवर्तते तद्बुद्ध्यादिकमपि सर्वं जडत्वात् पुरुषाधिष्ठितमेव प्रवर्तते इत्य
कामेनाप्यवश्यं वाच्यं अतस्त्रिगुणाधिष्ठाता तया पुरुषोऽस्तीति भावः हेत्वंतरमाह भोक्तृभावादिति साक्षित्वादित्यर्थः यस्यैतद्व्य
क्तमव्यक्तं सर्वं षड्रसादिवदनुभवनीयं स पुरुष आवश्यक इति भावः हेत्वंतरमाह कैवल्यार्थं प्रवृत्तेश्चेति शिष्टानुक्तौ प्रवर्तमाना दृ
श्यंते मुक्तिश्च प्रकृत्यादिषु मध्येन कस्यचिदपि संभवति त्रिगुणत्वेन सुखदुःखमोहात्मकत्वात् तस्मात् मुमुक्षुप्रवृत्तेरुद्देश्य मो
क्षाश्रयत्वेन पुरुषसिद्धिरिति संक्षेपः १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सां॰ चं॰
६
6

तदेवं पुरुषास्तित्वं प्रतिपाद्य तस्य बहुत्वं प्रतिपादयति जन्ममरणेति पुरुषबहुत्वं सिद्धं कस्मात् जन्ममरणकरणानां प्रतिनियमात् आत्म
निदेहसंबंधो जन्म तत्त्याग एव मरणं करणानि चक्षुरादीनि एषां प्रतिनियमः प्रत्येकमेवदर्शनं तस्मादात्मन एकत्वे तन्न स्यात् एकस्मि
न् जायमाने सर्व एव जाता म्रियेरन् वा स्युः एकस्मिन् सचक्षुषि सर्व एव सचक्षुषः स्युः एकेनाद्दष्टे सर्वे द्रष्टारः स्युः न चैतथा तस्माद्बहवः पु
रुषा इति भावः हेत्वंतरमाह अयुगपत्प्रवृत्तेश्चेति एकस्य धर्मेऽन्यस्य ज्ञानेऽन्यस्य वैराग्येऽन्यस्यैश्वर्येऽन्यस्य कामादाविति एवं प्रवृत्तिभेदो दृश्य
ते: आत्मन एकत्वे सर्वेषामेकस्मिन्नेव कार्ये युगपत्प्रवृत्तिः स्यात् न चैतथा तस्मादपि बहवः पुरुषा इति भावः हेत्वंतरमाह त्रैगुण्यविपर्यया
च्चेति एवकारो भिन्नक्रमः सिद्धमित्यस्यानंतरं द्रष्टव्यः सिद्धमेवेत्यर्थः त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययः परिणामभेदः कश्चित्सुखमेवानु
विंदः खमेव कश्चिन्मोह एवं विपर्यासस्तथा त्रैगुण्येन विपर्ययो भेदः सात्विकतामसराजसभेदेन पुरुषस्तस्मादेकत्वपक्षे तन्न स्यात् किं
तु सर्वे सुखिनो दुःखिनो वा स्युः एवं त्रिगुणभेदेन नीचोत्तममध्यमव्यवस्थापि न स्यात् न चांतःकरणभेदात्तद्युक्तिवाच्यं अंतःकरणभेदे पु
रुषभेदस्यैव बीजत्वात् अन्यथा तद्भेदस्याप्रमाणकत्वादिति भावः १८ एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह
जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव १८ तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य
पुरुषस्य कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च १९ तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं गुणकर्तृत्वेपि तथा कर्तेव भवत्युदासीनः २०
तस्माच्चेति त्रिगुणादेर्यो विपर्यासोऽत्रिगुणत्वविवेकित्वमविषयत्वमसाधारणत्वमप्रसवधर्मित्वं च तस्मात् तत्र चेतनत्वात् द्रष्टृत्वं सप्रकृति
शील ज्ञातृत्वं प्रकृतिरिमं संसारकारयति न त्वहं परस्यासितस्य तत्त्व अकर्तृभावो संसारवान् किंतु पुष्करपलाशवन्निर्लिप्त इति धीमत्त्वं अ
त्रैगुण्यात् कैवल्यं आत्यंतिकदुःखमन्यत्वं तथा माध्यस्थ्यं उपकाराऽपकारशक्तिरहितत्वं अकर्तृभावोऽकर्तृत्वं इच्छाद्विषप्रयत्नादिमन्यत्वं
मतएव साक्षित्वं ज्ञानैकस्वरूपत्वं कर्तृत्वादिमत्त्वे तदवभासकज्ञानैकस्वरूपो न स्यात् तद्भिन्नस्यैव दीपघटादौ तदवभासकत्वदर्शनादिति
संक्षेपः १९ ननु प्रकृतिर्बुद्धितत्त्वनिष्ठा चैतन्यमात्मनिष्ठं कथं तर्हि जानाम्यहमिदं करोमीति प्रकृतिचैतन्ययोः सामानाधिकरण्यप्रतीतिस्तत्राह त
स्मादिति यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणके युक्तितः सिद्धे तस्माद्भ्रांतिरियमित्यर्थः भ्रांतिबीजं तत्संयोगादिति तस्य पुरुषस्य संयोगः सन्नि
धानं प्रतिबिंबत्वं तस्मादचेतनमपि लिंगं बुद्धितत्त्वं चेतनावदिव जानामीति ज्ञानवदिव भवति एवं गुणकर्तृत्वे गुणैः सुखदुःखमोहरू
पैः कर्तृत्वं च तथा बुद्धिनिष्ठमात्मनि प्रतिबिंबितं भवति तेनोदासीनोपि पुरुषः करोमीति कर्तेव भवति अतोहं जानाम्यहमिदं करोमीति प्रत्य
ययोर्भिन्नयोरभेदाग्रहाद्बुद्धिनिमयेन धर्मसंसर्गग्रहरूपो भ्रम एव तयोस्तथात्वनिश्चयादिति संक्षेपः ॥२०॥ ॥ ६

किमर्थं तयोः संयोग इत्यत आह पुरुषस्य प्रधानस्य चोभयोरपि संयोगो दर्शनार्थं कैवल्यार्थं चेत्यन्वयः दर्शनं भोगः प्रधानस्य पुरुषेणैव
संभोगः सत्त्वपुरुषान्यताख्यातिनिबंधनः पुरुषस्य प्रधानेन विनाऽसंभवात् तयोः प्रधानपुरुषयोर्द्वयोः संयोगो भोक्तृभोग्यभावकः सन्नि
धानं भवतीत्यर्थः उभयस्य कार्ये उभयस्यैवापेक्षितत्वे दृष्टांतः पंग्वंधवदिति यथा पंग्वंधयोरेकत्र मिलने पंगुरंधस्य मार्गप्रदर्शनायांध
श्च पंगोर्नयनाय भवति तद्वदित्यर्थः भोगापवर्गयोर्द्वयोरेव सतः सर्गोऽपि संयोगादेवेत्याह तत्कृत इति महदादिलक्षणः सर्गः संयोगजन्य
इत्यर्थः अत एव प्रलये न सर्गः तयोस्तादृशसंयोगाभावादिति भावः सर्गक्रममाह प्रकृतेरिति अत्रेयं प्रक्रिया एकं प्रकृतितः किंचिन्न्यूनप
रिमाणं महत्त्वमंशांशिभावापन्नं जायते तदंशा बुद्धितत्त्वारंभा आत्मसमसंख्याः शरीरप्रवेशार्हपरिमाणका जीववद्भोगाय भवंति तेषा
माप्रकृतिरिव एवमहंकारो महत्तत्त्वादल्पपरिमाणोंऽशांशिभावापन्नो भवति तदंशाः सूक्ष्मा आत्मसमसंख्यास्तेऽपि तद्वद्भोगाय
भवंति षोडशको गणस्तु एकादशेंद्रियाणि पंचतन्मात्राणि शब्दादीनि अयं च तन्मात्राणि च तस्मादपि षोडशकं प्राप्यापि तेभ्यः पंचभ्यः पंचत
न्मात्रेभ्यः पंच महाभूतानि निर्वर्तंते तत्र शब्दतन्मात्रादाकाशं तस्य शब्दो गुणः शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणवान् शब्द

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥
प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः तस्मादपि षोडशकात्पंचभ्यः पंचभूतानि ॥ २२ ॥

स्पर्शतन्मात्रासहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणकं शब्दस्पर्शरूपतन्मात्रासहिताद्रसतन्मात्राज्जलं शब्दस्पर्शरूपरसगुणं शब्द
स्पर्शरूपरसतन्मात्रासहिताद्गंधतन्मात्रात्पृथ्वी शब्दस्पर्शरूपरसगंधगुणेति अत्र संग्रहः वियदेकगुणं प्रोक्तं द्वौ गुणौ मातरिश्वनः त्रयस्तेजसि
चत्वारः सलिले पंच भूमिगा इति अहंकारादेव पंचभूतानि भवंत्विति तु न कुशंक्यं शब्दादिगुणकानां तेषामहंकारत उत्पत्तेरसंभवात् अहंकार
स्य शब्दाद्यभावात् न चाहंकारादेव पंचगुणवत्त्वे प्रमाणमस्ति तथा सत्याकाशादीनां पंचानामेव पंचगुणवत्त्वं स्यात् एवं चाहंद्वियग्राह्यगुण
वत्त्वस्यैव भूतत्वेन तस्यापि भूततापत्तेः स्वस्य स्वकारणानुपपत्त्या तस्य भूतकारणत्वश्रुतिविरोधश्च स्यात् न चाहंकारे स्पर्शाद्यभावे कथं
तस्माच्छब्दादितन्मात्रोत्पत्तिरिति वाच्यं हरिद्रादीनां चूर्णादिसंयोगे न तदुभयारब्धे रक्तरूपवन्महदहंकारादिसंयोगेन शब्दतन्मात्राद्यु
त्पत्तिसंभवात् न च स्थूलानामप्येवमहंकारादुत्पत्तिर्वक्तुं शक्यते सविशेषगुणवद्द्रव्योपादानकत्वव्याप्तिनस्थूलत्वेन पारिशेष्यात्सूक्ष्म
द्रव्यारब्धत्वानुमानादहंकारोपादानकत्वनिरासादित्याद्यन्यत्र विस्तरः तन्मात्रत्वं च स्वसजातीयेषु शांतघोरमूढाख्यविशेषत्रयं नास्तीति
विजातीयतदन्याश्रयशब्दस्पर्शरूपरसगंधाश्रयसूक्ष्मद्रव्यत्वं शांतं सुखात्मकं घोरं दुःखात्मकं मूढं मोहात्मकं तन्मात्राणि चैवमादि

बुद्धेर्लक्षणमाह अध्यवसायो बुद्धिरिति अध्यवसायो ममेदं कर्तव्यमित्याकारकनिश्चयो दीपस्य शिखेव बुद्धिपरिणामावस्थाविशेषः परि
णामपरिणामिनोरभेदादभेदप्रयोगः चैतन्यस्य सदैकस्वभावस्याविषयावभासवैचित्र्याय इन्द्रियाणां व्यासंगोपपत्तये मनसः सादृश्यसाधन
स्य बुद्धेरपि दंशाभावनाहंकारस्य कल्पनासाध्य इव स्यात् प्रवृत्तिव्यर्थकस्य कर्तव्यत्वाध्यवसायस्य सम्भवाय बुद्धितत्वस्यावश्यकत्वमिति सय
मः एवं बुद्धिधर्मानाह धर्मो ज्ञानमिति धर्मो गंगास्नानादिजन्यो ऽष्टांगयोगजन्यश्च ज्ञानमात्मसाक्षात्कारः विरागो वैराग्यं तच्चतुर्विधं यत
मानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाभेदात् तत्र रागादिकषायपाचनार्थं निवृत्तिधर्मेषु प्रयतमानं पक्वापक्वानां दोषाणाम् अपक्वस्य पान
विवेकबलेन चिकित्सकवद्व्यवस्थापनं व्यतिरेकः पक्वसर्वकषायज्ञानेन निवृत्तौत्सुक्यता एकेन्द्रियं सर्वविषयपरत्वारोहितेनौत्सुक्यस्यापि निवृ
त्तिर्वशीकारः ऐश्वर्यमिति तदष्टविधं तदुक्तं अणिमा महिमा चैव लघिमा प्राप्तिरिन्द्रियैः प्राकाम्यं श्रुतदृष्टेषु शक्तिः प्रेरणमीशिता गु
णेष्वसंगो वशिता यत्कामस्तदवस्यतीति मूर्तेः शरीरस्य अणिमा अणुत्वं महिमा योजनादिव्यापित्वं लघिमा तूलादिवल्लघुत्वं

अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेव तद्रूपं तामसमेतद्विपर्यस्तम् ।२३॥
अभिमानोहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः इंद्रियक एकादशकस्तन्मात्रपंचकश्चैव ।२४॥

मिषु एवं गुणसंयोगेण बहुम संस्पर्शतीत्यादि रूपसामर्थ्यम् इन्द्रियैः प्राप्तिरित्युक्तं श्रुतदृष्टे प्राकाम्यमिच्छानभियातः यथा भूमौ
जले इव निमज्जतीत्यादि ईशिता तु भूतभौतिकानां सर्वेषां संकल्पमात्रेण प्रेरणं वशिता गुणभूता घनधीनता सत्यसंकल्पता यत्का
मस्तदवस्यतीति तत्राणिमेत्यनेनोक्तं एतद्विपर्यस्त एतद्विपरीतं अधर्माज्ञानावैराग्यानैश्वर्यरूपं तत्र धर्मः परस्त्रीसंगादिजन्यः अज्ञा
नं अनित्ये गृहदेहादौ नित्यबुद्धिः अशुचौ स्त्रीकायादौ शुचिबुद्धिः दुःखसंसारे सुखबुद्धिः अनात्मनि देहादावात्मबुद्धिर्गेरोहमि
त्यादिका अवैराग्यं विषयलम्पटता अनैश्वर्यं स्वाभिप्रेतविपरीतं २३ अहंकारस्य लक्षणमाह अभिमानोहंकार इति अभिमानोहमित्यं
तर्भावेन प्रत्ययो ममेदं ज्ञानाभिकरोमि मदर्थसाधनमिदम् अहमधिकृत इत्याद्याकारस्तस्य हेतुः कार्यकारणयोरभेदादभिमानो
हंकारः अहमित्यस्य पुरुषं अहमिति व्यपदेशं करोतीति सा दशास्त्रिन्निषं ममहंकारत्वभेदाग्रहात्पुरुषे प्रतिभासते न तु सोप्यहंकारस्य
विषयः तस्य कार्यभेदमाह तस्माद्द्विविध इति तस्मादहंकारात् सर्गः सृज्यत इति सर्गः प्रपंचः षोडशकगणरूपः अवान्तरव्यूहभेदेन द्वि
प्रकारः प्रवर्तते उत्पद्यते प्रकारद्वयमाह इंद्रियक इति तत्र तस्मादहंकारादिन्द्रियक एकादशको गणः एकादशसंख्याको व्यूहः चक्षुरा त
न्मात्रापंचकस्तन्मात्राजातीयः एवकारेण गणान्तरव्यवच्छेदकः ॥२४॥

ननु कथमेकस्मादहंकाराद्द्विविधः सर्गः तत्राह सात्विक इति प्रकाशलविभाभ्यामेकादशकः इंद्रियगणः सात्विकः उद्रिक्तसत्वगुणका
द्वैकृतात् विकृतोयमहंकार इति संख्याचार्यसंकेतविषयादहंकारात्प्रवर्तते भूतादेस्तामसादुद्रिक्ततमोगुणकादहंकारात्त
न्मात्रको गणः प्रवर्तते कस्मात् यतः स तामसः तामसगणस्य समानजातीयकारणादेवोत्पत्तेरुचितत्वात् ननु यदि सत्वतमो
भ्यामेव कार्यं तदा रजसः किं प्रयोजनं तत्राह तैजसादुभयमिति उत्कटरजोगुणकादुभयं भवति सत्वतमसोः स्वतोऽक्रियत्वेन र
जःप्रेर्यत्वात् तदुभयकार्यं रजःकार्यमेवातो रजोगुणोप्यावश्यक इति भावः तत्रेंद्रियजनकस्य वैकृतत्व कथनं लघुकार्यजनक
त्वाभिप्रायकं तन्मात्रजनकस्य भूतादित्वकथनं तामसत्वं महाकार्यजनकत्वाद्यभिप्रायकं रजोगुणस्य तैजसत्वकथनं सृष्टि
समर्थत्वाभिप्रायकमिति बोध्यं २५ एकादशेंद्रियाणां मध्ये दश बाह्येंद्रियाणि तान्याह बुद्धींद्रियाणि इति शब्दस्पर्शरूप

सात्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् २५
बुद्धींद्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूपस्थाख्यकर्मेंद्रियाण्याहुः २६ ॥

रसगंधा बुध्यंते एभिरिति बुद्धींद्रियाणि चक्षुरादीनि रूपाद्युपलब्धिहेतुत्वेन सिद्धान्यतींद्रियाणि तत्तद्गोलकाधिष्ठितानि
तत्र चक्षुः चष्टेऽनेनेति व्युत्पत्त्या चक्षुःपदाभिधेयं नयनं रूपादिषु मध्ये रूपस्यैव ग्राहकं श्रोत्रं श्रूयतेऽनेनेति व्युत्पत्त्या श्रोत्रप
दाभिधेयं कर्णविवरसंज्ञकं शब्दादिषु मध्ये शब्दस्यैव ग्राहकं घ्राणं जिघ्रत्यनेनेति व्युत्पत्त्या घ्राणपदाभिधेयं गंधादिषु
मध्ये गंधस्यैव ग्राहकं रसनं रसयत्यनेनेति व्युत्पत्त्या रसपदाभिधेयं रसादिषु मध्ये रसस्यैव ग्राहकं त्वक् स्पर्शः स्पृश्यते
ऽनेनेति व्युत्पत्त्या स्पर्शपदाभिधेयं त्वक्स्थानीयत्वात् त्वगिंद्रियं सर्वशरीरव्यापि स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकं तत्र त्वक्
चक्षुषी द्रव्यस्यापि ग्राहके अन्यानि तु गुणमात्रग्राहकाणीति विवेकः वागादीनि कर्म कुर्वंतीति कर्मेंद्रियाणि तद्विषया
वक्ष्यंते एतेषां सर्वेषामिंद्रियसंज्ञा कुत इति चेत् इंद्रियपदेन विषयास्तान्प्रति द्रवंतीति व्युत्पत्त्येति गृहाण चक्षुरादीनां
तत्तद्भूतगुणग्राहकत्वेन तत्तद्गुणवत्त्वेन तत्तद्भूतारब्धत्वानुमानं तु न साधीयः अप्रयोजकत्वादिति संक्षेपः २६ ॥

४

इन्द्रियं च मनोऽधिष्ठानेनैव तेषां स्वकार्यजननात् ननु भवतु मनो महदहंकारवन्नेन्द्रियं सहकारि परं तु तद्वदेव नेन्द्रियं इ
एकादशमिन्द्रियं मनस्तल्लक्षणमाह उभयात्मकमिति मनः स ज्ञकमिन्द्रियं संकल्पकं सामान्यत इन्द्रियेण गृहीतमर्थं सम्यक् कल्पयति
विशेषणविशेष्यभावेन चेतयतीति विशिष्टधीजनकं कार्यकारणयोरभेदात्तदात्मकं अत एवोभयात्मकं बुद्धीन्द्रियसहकारित्वात्
तदात्मकं कर्मेन्द्रियसहकारित्वात्कर्मेन्द्रियं भवितुमर्हतीति तावन्मात्रेण तस्येन्द्रियत्वमिति प्रसंगात्तत्राह इन्द्रियं चेति कुतः साधर्म्यात् इ
न्द्रियान्तरैः सात्विकाहंकारोपादानत्वं साधर्म्यं तस्मात् महदहंकारयोस्तु नेन्द्रियत्वं तथा चाभावादिति भावः एतेन मनो नेन्द्रियं
प्रत्यक्षत्वादिन्द्रियस्य चातीन्द्रियत्वादिति वदतां केषांचिन्मतं न सम्यगिति ध्वनितं इन्द्रियलक्षणस्य स्वमते प्रकृतसाधर्म्य
स्यातीन्द्रियत्वविशेषणगर्भितत्वादित्यास्तां विस्तरः ननु कथं सात्विकादहंकारादेकस्मादेकादशेन्द्रियाणि तत्राह गुणपरि

उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च २७॥
रूपादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः वचनादानविहरणोत्सर्गानंदाश्च पंचानां ॥२८॥

णामेति गुणानां सत्वादीनां यः परिणामविशेषो दृष्टविशेषादिरूपस्तस्मात्तथा च सहकारिभेदात्कार्यभेद इति भावः बा
ह्यभेदाश्चेति दृष्टान्तार्थं यथा बाह्यभेदास्तथैतदपीति भावः बाह्यभेदश्चेति पाठे तु आह भेदादपीन्द्रियभेद आवश्यक
बोध्य इत्यर्थः २७ तत्र बाह्येन्द्रियेषु ज्ञानेन्द्रियाणां व्यापारमाह रूपादिष्विति पंचानां बुद्धीन्द्रियाणां चक्षूरसनघ्राणश्रोत्र
शब्द ४ त्वचां रूपादिषु रूपरसगंधशब्दस्पर्शेषु आलोचनं निर्विकल्पकं वृत्तिः फलमात्रपदाद्वचनादिक्रियाव्यवच्छेदः तत्र चक्षुषो
रूपे रसनाया रसे घ्राणस्य गंधे श्रोत्रस्य शब्दे त्वचः स्पर्शे सामर्थ्यमिति विवेकः कर्मेन्द्रियव्यापारमाह वचनेति पंचानां
कर्मेन्द्रियाणां वचनादिकर्माणि व्यापारा इत्यर्थः तत्र वचनं उच्यतेऽनेनेति कंठताल्वादिकर्म वागिन्द्रियस्य आदानं ग्रहणं
हस्तस्य विहरणं गमनं पादयोः उत्सर्गो मलत्यागानुकूलकर्म पायोः आनंदः आनंदयतीति सुरतारतिरूपस्थस्येति बोध्यम् ८
॥२८॥

बुद्ध्यहंकारमनसां वृत्तिमाह स्वालक्षण्यमिति स्वमसाधारणं येषां तानि महदहंकारमनांसि तेषां भाव: स्वालक्षण्यं वृत्तिर्व्यापार: तत्र महतोऽध्यवसाय: अहंकारस्याभिमान: मनस: सविकल्पकं संकल्पापरपर्यायं भेदकमित्यर्थ: साधारणत्वासाधारणत्वाभ्यां वृत्तेर्द्वैविध्यमाह सैषेति एषा वृत्ति: असामान्या असाधारणी सामान्यामाह सामान्येति सामान्या चासौ करणवृत्तिश्चेति सामान्यकरणवृत्ति: पंच प्राणाद्या वायव: जीवनादिद्वारा सर्वकारणव्यापारबीजत्वात्तदन्वयव्यतिरेकानुविधायित्वात् इंद्रियव्यापारस्य व्यापारान्वयानुविधायित्वात् प्राणादीनां भेद: स्थानभेदादुक्तो ग्रंथेषु यथा हृदि प्राणो गुदेपान: समानो नाभिदेशग: उदान: कंठदेशस्थो व्यान: सर्वशरीरग: इत्यास्तां विस्तर: २९ असाधारणेषु व्यापारेषु यौगपद्यक्रमाभ्यामाह युगपदिति दृष्टे प्रत्यक्षविषये तस्य चतुष्टयस्य बाह्येंद्रियमनोहंकारमहत्तत्त्वस्य युगपद्वृत्ति क्रमशश्च भवति तथाहि विद्युत्संपाते व्याघ्रादौ चेंद्रियसन्निकर्षे युगपदेव निर्विकल्पकसविकल्पकाभिमानाध्यवसाया: प्रादुर्भवंति अतस्ततोऽपि त्वरितमपसरति क्रमशश्च मंदालोके प्रथमं किंचिदिदमि

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या: सामान्यकरणवृत्ति: प्राणाद्या वायव: पंच २९ युगपच्चतुष्टयस्याहि वृत्ति: क्रमशश्च
तस्य निर्दिष्टा दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्ति: ३० स्वां स्वां प्रतिपद्यंते परस्पराकूतहेतुकां वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते कं

ति जानाति पश्चाद्धनुष्कमिति निश्चिनोति ततो मां प्रत्येतीत्यभिमन्यते अपाध्यवस्यति अपसरामीत: स्थानादित्येवं क्रमेणैतेषामेते व्यापारा भवंति तथाऽदृष्टे परोक्षविषये पि त्रयस्येंद्रियरहितस्य त्रयस्य युगपत्क्रमशश्च व्यापारा ज्ञेया: अनुमानशब्दयोर्विषये इंद्रियाप्रवृत्तेस्त्रयस्य तु क्रं तयोर्विषये निर्विकल्पकाभावात् प्रथमं मनस एव व्यापार: अनुमानशब्दविषयवृत्तिर्हि तत्पूर्विका दृष्टपूर्विकेति विशेष: अनुमाने व्याप्तिज्ञानार्थं प्रत्यक्षापेक्षा शब्दे शक्यतमानापेक्षया प्रत्यक्षापेक्षेति संक्षेप: ३० ननु युगपत्प्रत्यक्षे न संभवति इंद्रियव्यापाराधीनप्रवृत्तिकत्वान्मनस: एवमहंकारमहतोर्मनोहंकारव्यापाराधीनव्यापारकत्वात्तत्राह स्वां स्वामिति आकूतमभिप्राय: सु वा चेतनानो बाधित इत्याकूतमत्र प्रत्यक्षानुरक्तत्वं तदेकस्य व्यापारजननसमय एव तथा चासति बाधके यस्यापि सकालस्य इति यौगपद्यं संभवति असपक्षे संशयादिरिव बाध इति बोध्यं स्वां स्वां प्रतिपद्यंते इत्यनेन युगपच्च वृत्तावपि यात्रिकशालिकानामिव हेतुभेदात्प्रवृत्तिसंकर इति ज्ञापितं तथापि करणैः केन प्रेर्यंते तत्राह पुरुषार्थेति भोगापवर्गलक्षण: पुरुषार्थ एव स्वविषयकेच्छाद्वारा करणव्यापारहेतुरित्यर्थ: कार्यते तत्रेच्छावान् जीव एव तत्प्रावश्यक: ईश्वरस्तु न तदपेक्षायां मानाभावादिति भाव: ३१ ॥ ॥ ॥

करणानि कानीत्यत आह करणमिति त्रयोदशविधं बुद्ध्यहंकारौ एकादशेन्द्रियाणि च एषां व्यापारमाह आहरणेत्यादि तत्राहरणं कर्म
इन्द्रियाणां धारणं महदहंकारमनसां स्ववृत्तिप्राणादि पंचवायोर्देहधारणात् प्रकाशो बुद्धीन्द्रियाणां व्यापारः विषयाः कतिविधा
स्तत्राह कार्यं चेति तस्य त्रयोदशविधस्य तत्राहार्यं दिव्यादिभेदेन प्रत्येकं द्विविधाद्दशधा कर्मेन्द्रियाणां एवं धार्यं शरीरादि
मारंभकभूतानां दिव्यादिभेदाद्दशधा बुद्ध्यहंकारमनसां प्रकाश्यं शब्दस्पर्शरूपरसगंधाख्यं दिव्यादिभेदात् दशधा बुद्धीन्द्रिया
णां ३२ त्रयोदशकरणानां भेदमाह अंतःकरणमिति महदहंकारमनोभेदेन त्रिविधमंतःकरणं बाह्यकरणं दशधा पंचबुद्धी
न्द्रियपंचकर्मेन्द्रियभेदात् त्रिविधस्यांतःकरणस्य विषयव्यापारमाख्याति जनयतीति विषयाख्यं मनोहंकारबुद्धीनां व्यापारेषु
बुद्धीन्द्रियव्यापारस्योपयोगात् कर्मेन्द्रियव्यापारस्यापि बुद्धीन्द्रियद्वारांतःकरणव्यापारे उपयोगः कर्मेन्द्रियव्यापारेण जनितेष

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरं कार्यं च तस्य दशधाहार्यं धार्यं प्रकाश्यं च ३२ अंतःकरणं त्रिविधं दशधा बाह्यं त्र
यस्य विषयाख्यं सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं ३३ बुद्धीन्द्रियाणि तेषां पंच विशेषाविशेषविषयाणि वाग्भवति शब्दविषया शेषाणि तु
पंचविषयाणि ३४ ॥ ०॥

दर्थे बुद्धीन्द्रियप्रवृत्तेः अंतःकरणप्रवृत्तेः बाह्येन्द्रियं किं तत्राह सांप्रतकाले वर्तमानमात्रविषयकं बाह्यं बहिरिन्द्रियं कर्मेन्द्रियस्य
तत्परंपरया बोध्यं त्रिकालं अतीतानागतवर्तमानविषयं तत्रानुमानशब्दसहकारेणातीतानागतविषयकं इन्द्रियसहकारेण
वर्तमानविषयकं आभ्यंतरं मनोबुद्ध्यहंकाराख्यं ३३ बाह्येन्द्रियाणां विषयान्विभजते बुद्धीति तेषां दशेन्द्रियाणां मध्ये बुद्धी
न्द्रियाणि विशेषा योग्या अविशेषा अतीन्द्रियास्त एव विषया येषां तादृशानि तत्र योग्यायोग्ययोर्ग्रहणं योगीन्द्रियाणां यो
ग्यमात्रग्रहणमस्मदादीन्द्रियाणां एवं कर्मेन्द्रियेषु वाक् शब्दविषया तज्जनकत्वात् शब्दस्य तन्मात्ररूपस्तस्याहंकार
जन्यत्वात् शेषाणि वाक्पाणिपादपायूपस्थानि पंचविषयाणि पाणिपाद्याहार्याणां घटादीनां पंचशब्दाद्यात्मकत्वा
दिति ॥३४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

बाह्येंद्रियाणामप्रधान्यं वक्तुमाह सांतःकरणेति अंतःकरणं मनोहंकारौ ताभ्यां सहिता बुद्धिः यस्मात् सर्वमिंद्रियोपनीतं विषयं पुरुषोप
कारकमवगाहते त्यध्यवस्यति तस्मात् त्रिविधमंतःकरणं द्वारि द्वारस्य सास्तीति द्वारित्वात् शेषाणि चेंद्रियाणि द्वाराणि साक्षात्पर
परायां चेंद्रियद्वारेणांतःकरणानां विषयावगाहनात् द्वारत्वं चानोपकारकत्वं तच्चालोचनद्वारा प्रागुक्तदिशा बोध्यं ३५ अंतः
करणेषु बुद्धेः प्रधान्यं वक्तुमाह एते प्रदीपकल्पा इति एते गुणविशेषाः गुणानां भेदाः सत्वाद्यपेषु ते दशेंद्रियमनोहंकाराः पु
रुषस्य कृत्स्नमर्थं प्रकाश्य बुद्धौ प्रयच्छंति तत्र प्रकाश्यं अंति यथा दीपोयं प्रकाश्य पुरुषे प्रापयति ३६ बुद्धिरपि न स्वार्था किं
तु परार्थे वेत्याह सर्वमिति सर्वं शब्दादियोग्यं प्रतिपं उपभोगः पुरुषस्य तं यस्मात् साधयति तस्मात् सा प्रधाना विपरार्थे

सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ३५ एते प्रदीपकल्पाः परस्पर
विलक्षणा गुणविशेषाः कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति ३६ सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः
सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मं ३७ तन्मात्राण्यविशेषास्तेभ्यो भूतानि पंच पंचभ्यः एते स्मृता विशेषाः शां
ताघोराश्च मूढाश्च ॥३८॥

वन स्वार्थेति भावः मोक्षहेतुज्ञानजनकत्वादपि सत्यमभिप्रेत्याह सैव पुनर्विवेकदशायां प्रधानपुरुषयोरंतरं वै
लक्षण्यं सूक्ष्मं अतिदुर्ज्ञेयं विशिनष्टि विषयीकरोति अध्यवसायरूपत्वात् बुद्धिरेव तथेति भावः ३७ अविशेषविशेषानुक्तौ
तौ काविंत्यत आह तन्मात्रेति तन्मात्राणि सूक्ष्माणि शब्दादीनि अविशेषाः अयोग्यत्वात् तेभ्यः तन्मात्रेभ्यः पंचभ्यो भूतानि स्थू
लानि पृथिव्यादीनि एते पृथिव्यादयः विशेषाः योग्यत्वात् कुतः शांता इति च एको हेतौ द्वितीयः समुच्चये यस्मात् आकाशा
दिषु स्थूलेषु केचित् शांताः सत्वप्रधानतया सुखकराः प्रसन्ना लघवश्च केचिद्रजःप्रधानतया घोराः दुःखकराः केचित्तमः
प्राधान्यात् मूढा मोहकरा गुरवश्च गुणानां गुणप्रधानभावतो यथेदं तथोपपादितमधस्तात् ॥ ३८ ॥ ॥ ॥ ॥

एतावत एव विशेषा इति न किंत्वन्येपि संतीत्याह सूक्ष्मेति सूक्ष्मा लिंगशरीराख्याः मातापितृजाः स्थूलदेहाः प्रभूताः पर्वतादयः
घाः विशेषकार्यत्वात् त्रिविधाः विशेषाः तत्र सूक्ष्मदेहाः सूक्ष्मतन्मात्राद्यारब्धत्वात् मातापितृजा तु मातापितृभ्यां जन्यशुक्रशोणिता
द्यारब्धत्वात् प्रभूतास्तु तद्विलक्षणकारणकत्वात् तेषां मध्ये सूक्ष्माणि यतो नित्या सर्वावस्था स्थिताः मातापितृजा निवर्तंते मरणांका
लेपतंती उपलक्षणमेतत् प्रभूतानां तेपि निवर्तंते इति बोध्यं विशिष्य कथनं तु गौणजीवत्वाभिप्रायकं बोध्यं ३९ लिंगशरीरधर्मा
नाह पूर्वोत्पन्नमिति लिंगशरीरं पूर्वोत्पन्नं पूर्वं सृष्ट्यादिसर्गे पूर्वस्मात् प्रधानादुत्पन्नम् आविर्भूतं असक्तं प्रव्याहतं शिलामप्यनुप्रवि
शति नियतं प्रत्यात्मभिन्नं महदादि सूक्ष्मपर्यंतं महदहंकारमनोदशेंद्रियतन्मात्रसमुदायरूपं संसरति नवं नवं स्थूलशरीरमुपाद

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः सूक्ष्मास्तेषां नियता मातापितृजा निवर्तंते ३९ पूर्वोत्पन्नमसक्तं नियतं मह
दादि सूक्ष्मपर्यंतं संसरति निरुपभोगं भावैरधिवासितं लिंगं ४० चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया तद्वद्विना विशे
षैस्तिष्ठति न निराश्रयं लिंगं ॥४१॥

ते पूर्वं पूर्वं च जहाति निरुपभोगं स्थूलदेहं विना भोगायासमर्थं भावैरधिवासितं भावैर्धर्मादिभिरंतर्भावैस्त्वधिवासितं कुतस्त्या
राधानं यागजसंस्कारोदयमेव ४० ननु तर्हि साहंकारेंद्रियबुद्धितत्त्व भोगोस्तु कृतं सूक्ष्मशरीरेण प्रामाणिकेनेत्यत आह चित्रं य
थेति आश्रयं विना यथा चित्रं न तिष्ठति तदाश्रित्यैव तिष्ठति तद्वद्विशेषैरतिसूक्ष्मैः शरीरैर्विना लिंगं लिंगतः ज्ञापनाद्बुद्ध्यादिकं त्र
तितन्मात्रादिसमुदायरूपत्वान्निराश्रयेण न तिष्ठति किंतु सूक्ष्मशरीराश्रितमेव तिष्ठति अतस्तेषां धर्मिभूतं सूक्ष्मशरीरमावश्यकं
स्राभिप्रायकमिदमिति वर्ण्यते ततः सत्यवतः कायात्पाशबद्धं वशंगतं अंगुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यम इत्यादि प्रामाण्याच्चे
ति भावः केचित्तु स्थूलशरीरावश्यकत्वाभिप्रायकमिदमिति वर्णयंति तथाहि लिंगसमुदायात्मकं लिंगशरीरं विशेषैः स्थूलैर्देहैर्विना
निराश्रयं सन्न तिष्ठति किंतु स्थूलशरीरमाश्रित्यैव तिष्ठति अतो न लिंगशरीरेण स्थूलशरीरस्यान्यथासिद्धिरिति भावः शेषं प्राग्वत् ४१ 

एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमप्याह पुरुषार्थेति निमित्तं धर्मादि नैमित्तिकं धर्मादिकार
णकं स्थूलदेहादि तत् उभयप्रसंगेन तदुभयसंबंधेन लिंगमिदं सूक्ष्मशरीरं नटवद्व्यवतिष्ठते यथा नटो बहुविधा निरूपाणि
गृहीत्वा व्यवहरति तथेदमपि देवादिशरीरं परिगृह्य व्यवहरति किमर्थं तत्राह पुरुषार्थहेतुकमिति पुरुषार्थो हेतुर्निमित्तं यस्य लो
दृशं पुरुषार्थफलकमिति यावत् तत्तद्भोगादृष्टवलोत्तत्तद्भोगार्थमेव तथा व्यवहरतीत्यर्थः कुतोऽस्यैवंविधो महिमा तत्राह प्रकृते
र्विभुत्वयोगादिति तथा च पुराणे वैश्वरूप्यात्प्रधानस्य परिणामोऽयमीदृश इति प्रकृत्याश्रयोपगमात् महदादिकं सर्वमुपपद्य
त इति भावः ४२ प्राकृतवैकृतयोरप्रसिद्धत्वात्तौ केति आह सांसिद्धिकाश्चेत्यादि भावा धर्मा ये सांसिद्धिकाः स्वाभाविकाः त एव प्रा
कृतिकाः यावद्वस्तुस्थायिनो यथा महत्तत्त्वाहंकारादयः वैकृतिकाः कदाचिद्भवः तेषामध्ये धर्माद्याः करणं बुद्धितत्त्वं तदाश्रयिणो

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं ४२ सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिका
श्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ४२ धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञानेन चापवर्गो वि
पर्ययादिष्यते बंधः ४४॥

दृष्टाः सांख्याचार्यैः कार्याश्रयिणः कार्यशरीरं तदाश्रयिणः कललाद्याः कललबुद्बुदमांसपेशीकंदरांगप्रत्यंगव्यूहा गर्भस्थस्य ततो निर्गत
स्य बाल्यकौमारयौवनवार्द्धकानीति संक्षेपः ४३ बुद्धिनिष्ठानां धर्मादीनां प्रयोजनमाह धर्मेणेति धर्मेण केवलस्य ज्ञानेन परहिंसावर्जि
तेन मुख्यरूपेण च परहिंसापूर्वकेण ऊर्ध्वं ब्राह्मप्राजापत्यैन्द्रगान्धर्वयाक्षपैत्र्यादिषु लोकेषु अधस्तात् रौरवमहारौरववह्निवैतरणीकुं
भीपाकतामिस्रान्धतामिस्रनरकादिषु अधर्मेण शास्त्रनिषिद्धाचरणेन परपीडनादिना गमनं भवति ज्ञानेन आत्मसाक्षात्कारेण अपवर्गो
मोक्षः विपर्ययात् अज्ञानात् बंधः प्राकृतिकवैकृतिकदाक्षिणभेदेन त्रिविधः तत्र प्राकृतिकः आत्मबुद्ध्या प्रकृत्युपासननिबंधनः यथा पू
र्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिंतका इति वैकृतिक आत्मबुद्ध्या इंद्रियोपासननिबंधनः यथा दश मन्वंतराणीह तिष्ठंतीन्द्रियचिंत
का इत्यादि दाक्षिणः पुरुषमजानतः कामनया वैदिककर्मानुष्ठाननिबंधनो यथा पुरुषज्ञानहीनानां स्वर्गादार्थी हि कुर्वतां तानि
तानीह कर्माणि तेषां बंधस्तु दाक्षिण इति संज्ञा तु दक्षिणासंबंधनिबंधना बोध्येति संक्षेपः॥ ४४॥ ॥ ॥ ॥ ॥

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतः सा पुरुषज्ञस्यैव मोक्षकथनेनान्यस्य मोक्षाभावकथनात् ज्ञानरहितस्य विर
क्तस्यापि न मोक्ष इत्याशयवानाह वैराग्यादिति दृष्टानुश्रविकविषयेषु लब्धविशेषरूपाद्वैराग्यात् केवलात् प्रकृतिलय प्रकृतिपदेन मह
दहंकारादयोपि गृह्यंते तेष्वात्मबुद्ध्योपास्यमानेषु लयो भवतीत्यर्थः राजसात् रजःकार्यात् रागात् कामक्रोधादेः संसारो भवति तत्र
यागादिगोचरः स्वर्गादिः स्वर्गादिगोचरादिह लोके भोगएवेति विवेकः ऐश्वर्यात् अणिमादिलक्षणात् अविघातो गतिप्रतिबंधाभावो
पि विपर्ययादनैश्वर्यात् तद्विपर्यासः सर्वत्र गतिविच्छेदः यथा कस्यचिदनीश्वरस्य परगृहे प्रतिघातः ४५ ननु विपर्ययादयो ये सां
ख्येभ्यः श्रूयंते किं ते तत्त्वांतराणि कतिविधा वा तत्राह एषेति विपर्ययाश्चाशक्तिश्च तुष्टिश्च सिद्धिश्च आख्या नामानि यस्य स एष

वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ४५ एष प्रत्ययसर्गो विपर्ययशक्तितुष्टि
सिद्ध्याख्यः गुणवैषम्यविमर्दात्तस्य च भेदास्तु पंचाशत् ४६ पंच विपर्ययभेदा भवंत्यशक्तिस्तु करणवैकल्यात् अष्टाविंशतिभे
दा तुष्टिर्नवधाऽष्टधा सिद्धिः ४७॥

गुणत्रयमयो बुद्धिस्तत्सर्गस्तज्जन्यः तथा च बुद्धितत्त्वप्रविष्टानतत्त्वांतरं कार्यकारणाभेदात् तस्य भेदाः पंचाशद्भवंते ननु कथ
मेककारणादेतानि कार्याणि तत्राह गुणवैषम्यविमर्दादिति गुणानां वैषम्यं न्यूनाधिकबलता मंदमध्याधिकभावेन नानावि
धातया विमर्दः गुणस्य गुणयोर्वा अभिभवस्तस्मादित्यर्थः तदेवं कार्यकारणयोरभेदेन विपर्ययस्याज्ञातेः शक्तेरधर्मे तुष्टेर्धर्मे
सिद्धेर्ज्ञाने इति विवेकः अज्ञानादयस्तु बुद्धेरेवातो विपर्ययादयोपीति न तत्त्वांतराणीत्यस्याविस्तरः ४६ पंचाशदिति सामान्य
तउक्तं तत्र कस्य कतिविधा भेदास्तत्राह पंच विपर्ययेति विपर्ययः संसारबीजं क्लेशाः पंच अविद्यास्मितारागद्वेषाभिनि
वेशास्तेषामेव यथासंख्यं तमो मोह महामोह तामिस्रांधतामिस्रसंज्ञाः अभिनिवेशो भयं ननु रोगादिकृतानामशक्तीनां रो
गसमसंख्यतया कथमष्टाविंशतिधाशक्तिस्तत्राह करणवैकल्यादिति करणानां बुद्धितत्त्वैकादशेंद्रियाणां यद्वैकल्यं वध
तस्माद्याशक्तिः सा अष्टाविंशतिधा स्पष्टः शेषं सुगमम् ॥४७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पंचानां विपर्ययाणामवांतरभेदमाह भेदस्तमस इति अष्टसु प्रकृतिमहदहंकारपंचतन्मात्रेष्वात्मबुद्धिरविद्या तस्या एव तम इति संज्ञा तं
सा अष्टविधविषयकत्वादष्टविधत्वं अणिमाद्यैश्वर्यं प्राप्य सिद्धोहमस्मीत्यात्मन्यहंभावेनाभिमानविशेषोऽस्मिता अणिमाद्यैश्व
र्यविषयकत्वात्तस्या अष्टविधत्वं सैव च मोहसंज्ञिका मोहस्य चेति चकारादष्टविधस्येति शब्दादिषु पंचविषयेषु दिव्यादिव्यतया
दशविधेषूपादेयत्वबुद्ध्या रागः स एव महामोहः विषयस्य दशविधत्वादस्य दशविधत्वं परेणोपभुज्यमानेषु तेषु शब्दादिविषये
षु परेणाप्राप्तेषु चाणिमादिष्वष्टसु द्वेषस्तामिस्राख्यः अष्टादशविषयत्वादस्याष्टादशविधत्वं अभिनिवेशस्त्रास अंधतामिस्रा

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा तथा भवत्यंधतामिस्रः ४८ एकादशेंद्रिय
वधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा सप्तदशधा च बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९ ॥ ॥

ख्यः शब्दादयो दशाणिमाद्यैश्वर्यं चाष्टविधं केषांचिद्भविष्यति वेति भयं अष्टादशविषयकत्वादष्टादशविधं तदेवं विपर्य
यभेदा द्विषष्टिरिति ४८ अशक्तेरष्टाविंशतिभेदानाह एकादशेति एकादशेंद्रियाणां श्रोत्रत्वगक्षिरसनघ्राणवाक्
पाणिपादपायूपस्थमनसां वधाः वैगुण्यानि यथायथासंख्यं बाधिर्यं कुष्ठतांधत्वं जडताऽजिघ्रता तथा मूकता कौणिपंगुत्व
क्लैब्योदावर्तमंदताः यद्धेतुकास्वव्यापारे बुद्धेरशक्तिरिति सह बुद्धिवधैरित्युक्तं अधुना कति बुद्धेः स्वरूपतो वधास्तत्राह सप्त
दशधेति तुष्टिर्नवधा वक्ष्यते एवं सिद्धिरष्टधा तेषां विपर्ययात् व्यतिरेकादिति ४९ ॥ ॥ ॥ ॥ ॥ ॥

तुष्टेर्नवभेदानाह आध्यात्मिकाश्चेति प्रकृत्यादिभिन्नत्वेनात्मसाक्षात्कारो मोक्षोपायः परं तु साक्षात्कार प्रकृतेः परिणामविशेष प्रकृ
तित एव संभविष्यतीतिकृत्वा तत्र न यतते तस्य प्रकृत्याख्या तुष्टिरंभ इत्युच्यते कश्चिदेव चिंतयति न प्रकृतिमात्रा संभवति तथा सति
गृहस्थस्यापि संभवेत् किं तु संन्यासाश्रमोपादाने भविष्यतीत्याशसंन्यासादिना तुष्टा तिष्ठति तस्योपासनाख्या सलिलमित्युच्यते सैव
परिव्राजाख्या तुष्टिरितिगीयते प्रव्रज्याख्यापि कालविशेषं प्राप्य तं करिष्यतीत्यतः कालस्यैव प्राधान्यात्तज्ज्ञानप्राप्तिकाले ज्ञानं
भविष्यत्येवेत्यलं प्रयासेनेति तुष्टिः कालाख्या मेघ इत्युच्यते कालविशेषोपि सः भाग्यवलादेव भविष्यति अतो भाग्यमेव हेतुर्नान्य
दित्यलं प्रयासैरिति तुष्टिर्भाग्याख्या वृष्टिरित्युच्यते एतास्तस्य आध्यात्मिकाः विषयोपरमो वैराग्यं तेन तुष्टयः पंच वाह्याः प्रकृत्यादि
भिन्नत्वेनात्मज्ञानाभावात् तथा हि अर्जनरक्षणक्षयभोगहिंसासु दोषदर्शनाद्यंचोपरमा भवंति तेऽत्र तु कथायां तुष्टयोपि पंच भवंति य
थार्जनोपायः सेवादयो दुःखादा अतोलं प्रयासैरिति या तुष्टिः सा पारमुच्यते तथा कथंचिदर्जितस्य चोरादितो रक्षणमपि कु
ष्टमितिकृत्वा या तुष्टिः सा सुपाराख्या एवं कथंचिद्रक्षितमपि भोगात् क्षयं गमिष्यत्येवेतिकृत्वा या तुष्टिः सा पारपारमुच्यते एवं

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः वाह्या विषयोपरमात् पंच नव तुष्टयोभिहिताः ५०

ऊहः शब्दोध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोंकुशस्त्रिविधः ॥ ५१ ॥

शब्दादिभोगाभ्यासात्प्रवर्तते कामास्तेन पुनः विषयप्राप्तौ च प्राप्ते च कामिनः स्वंतीतिकृत्वा या तुष्टिः सानुत्तमाम्भ इत्युच्यते एवं भोगेऽ
वश्यं प्राणिहिंसा जायत एवेति दोषदर्शनाद्विषयोपरमे या तुष्टिः सा उत्तमाम्भ इत्युच्यते तदेवमाध्यात्मिकाश्चतस्रो वाह्याभिः पंचभि
र्नव तुष्टयोभिमताः अंभः सलिलं मेघो वृष्टिः पारं तथा सुपारं च पारापारमनुत्तमाम्भ उत्तमाम्भश्चेति ५० अथ सिद्धीराह ऊह इति ऊ
हो विचारसामर्थ्यं विशेषदर्शनमिति यावत् शब्दः क्रियाकारकभावाच्च पदसमुदायव्युत्पत्तिः अध्ययनं गुरुमुखतः शास्त्रार्थज्ञानं दुःखवि
घाता दुःखशमनोपायाः त्रय इति दुःखानां त्रित्वात् शमनोपायानामपि त्रित्वं सुहृत्प्राप्तिः आध्यात्मिकजनसंगः दानं दोषशोधनं इति
वाह्याभ्यंतरशौचं सिध्यत्यनयेति सिद्धिः तत्र दुःखविघातसिद्धिः फलत्वात् मुख्या अन्यास्तु तत्साधनत्वाद्गौण्य इति विवेकः तत्रोहादेः संज्ञा
विशेषश्चाकोरे यथा तार सुतार तारतार प्रमोद प्रमुदित मोदमान रम्यक सदामुदिताख्याः सिद्धय इति आसामुपादेयत्वे विपर्ययाशक्तितु
ष्टीनां तु हेयत्वं ज्ञापयितुमाह सिद्धेः पूर्वोंकुशस्त्रिविध इति पूर्वः पूर्वोक्तः विपर्ययाशक्तितुष्टिरूपस्त्रिविधः सिद्धेरंकुशः कारणं विघटना

ननु भोगो विषयसंचरेण न भवतीत्याकुर्यादि सर्गएव वास्तु कृतं महदाद्यतीन्द्रियसर्गेण तत्राह नविनाभावैरितिभावैः प्रत्ययैर्विषयैर्विना लिंगं महदाद्यतीन्द्रियवर्गं न भोगसाधनमित्यर्थः लिंगेन महदादिना विना भावानां विषयाणां न निर्वृत्तिः न भोगसाधनत्वं अयमभिप्रायः नहि विषयः स्वरूपतो भोगहेतुः सर्वेषां सर्वविषयभोगापत्तेरपितु ज्ञात एव ज्ञानं चेन्द्रियात्तःकरणैर्विना नेत्युभयस्वीयकार तस्माद्द्वयोरप्यावश्यकत्वात् लिंगाख्यः लिंग्यते तावन्नतु साक्षात्क्रियत इति लिंगं महदाद्यतीन्द्रियवर्गः भावाख्यः भूयते प्राप्यते ऽयोदिन्द्रियेणेति विषयवर्गः प्रत्यक्षसिद्ध ५२ भौतिकसर्गविभागमाह अष्टविकल्प इति ब्राह्मप्राजापत्यैन्द्रियगन्धर्वयक्षराक्षसपैशाचभेदादष्टविधो दैव इत्यर्थः तैर्यग्योन इति पशुपक्षिसर्पकीटस्थावरभेदात्पंचविध इत्यर्थः मानुष्यश्चैकविधः समासतः ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षयेति भौतिकः देहिकः तेन घटादिनिरासः केचित्तु घटादेः स्थावरं तर्भावं वदंति ५३ भौतिकस्य विशेषमाह ऊर्ध्वमिति भूर्लोकादूर्ध्वं सत्त्वविशालः सत्त्वबहुलः

न विना भावैर्लिंगं न विना लिंगेन भावनिर्वृत्तिः लिंगाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः ५२ अष्टविकल्पो

दैवस्तैर्यग्योनश्च पंचधा भवति मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ५३ ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूल

तः सर्गः मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यंतः ५४ तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः लिंगस्याविनिवृत्ते

स्तस्माद्दुःखं स्वभावेन ॥५५॥

तत्रत्येषु रजस्तमसोः सत्त्वेपि सत्त्वाधिक्यश्रवणात् मूलतः अधः पतनशीलस्तैर्यग्योनस्तमोविशालस्तमोबहुलस्तेषु सत्त्वरजसोः सत्त्वेपि तमस आधिक्योपलब्धेः मध्ये भूर्लोके रजोविशालः सत्त्वतमसोः सत्त्वेपि धर्माधर्मप्रवृत्तिपरत्वदर्शनेन रजस आधिक्यकल्पनात् ब्रह्मादीति सोयं ब्रह्मादिस्तम्बपर्यंतः सर्गो लोकभेदेनैवं संस्थितिक इत्यर्थः स्तम्बः स्थावरः ५४ तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दुःखतामाह तत्र जरामरणेति यतः पुरुषः स्वयं चेतनोपि तत्र लोकत्रयारब्धसर्गे जरामरणकृतं दुःखं प्राप्नोति तस्मात् दुःखस्वभावेन स्वत एव सर्गो दुःखरूपो विवेकिनामिति शेषः यथाह भगवान् पतंजलिः परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति अत्र परिणामपदेन जरादिदुःखं बोध्यं प्राप्नोतीति तदाह लिंगस्याविनिवृत्तेः तापपदेन मानभूर्वं हि म्रियासमिति मरणत्रासदुःखं बोध्यं संस्कारपदेन पुनर्जननादिदुःखं प्राप्नोतीति तदाह लिंगस्याविनिवृत्तेः यावल्लिंगं महदादि न निवर्तते तावत् ज्ञानेन लिंगस्य निवृत्तौ तु मोक्षमधिगच्छतीति भावः ॥५५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सर्वस्य प्रकृतिमात्रारब्धत्वं च कृतमुपसंहरति इत्येषेति इत्थं तु उपसंहारे एवं महदादिविशेषपर्यन्तः प्रकृतिकृतः प्रकृत्यैवोत्करीत्याकृतः नेश्व
रेण न वाऽदृष्टेनेत्यर्थः विशेषभूतं पृथिव्यादि अयमभिसंधिः धर्मसापेक्षत्वनिरपेक्षत्वविकल्पग्राहग्रस्तत्वान्मानभावान्नेश्वरः कारणे
नापि कार्यस्य कारणत्वायोगात् प्रलयकालीनानारम्भकपरमाण्वादिक्रियादेः व्यभिचारेण कार्यमात्रेऽदृष्टादीनामकारणत्वाच्चेति दि
क् अचेतनत्वेन स्वप्रयोजनाभावात् एवं आरम्भः पदार्थ एव ननु कस्यार्थे आरम्भस्तत्राह प्रतिपुरुषेति प्रत्येकपुरुषार्थः अत्र भोजयि
तुमिति विहाय विमोक्षार्थमित्युक्तिस्तु एकस्य मोक्षेऽपि सर्गस्य नाशो नास्ति सर्वसाधारणत्वात् इति ज्ञापनाय अत एव प्रतिपुरुषमुक्तम् अ
ह चैवं समानतंत्रे भगवान् पतंजलिः तदर्थ एव दृश्यस्यात्मा कृतार्थं प्रति प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वादिति पदार्थारंभेण
कोऽपि विवाद इत्याह स्वार्थ इवेति यथान्यो जनः स्वार्थे प्रवर्तते तथैवास्य परार्थं आरम्भो घटत एव प्रयोजनवत्त्वमात्रस्य प्रवृत्तिमूलत्वा
दित्यास्तां विस्तरः ५६ नन्वचेतनायाः प्रकृतेः कथं प्रवृत्तिस्तत्राह अन्वयव्यतिरेकाभ्यां वत्सविवृद्ध्यादिप्रयोजनेनैवाचेतनस्य क्षीरा

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः प्रतिविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ५६ वत्सविवृद्धिनिमित्तं क्षीरस्य यथा
प्रवृत्तिरज्ञस्य पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ५७ औत्सुक्यस्य निवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः पुरुषस्य
विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥ ॥ ॥

देः प्रवृत्तिदर्शनात् प्रवृत्तिर्न चेतननियता किं तु दृष्टसाध्या अतस्तद्वदेवाचेतनाया अपि प्रकृतेः पुरुषविमोक्षार्थं प्रवृत्तौ
न किंचिद्बाधकमिति भावः न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबंधनतया प्रवृत्तेश्चेतनाया प्रवृत्तेश्चेतननियतत्वमस्त्वाह तमेव॰
तथा च कथमिति वाच्यं ईश्वरे मानाभावात् प्रमाणिकत्वेऽप्याप्तकामस्य प्रयोजनं विना प्रवर्तकत्वायोगात् न च कारुण्यात्तदिति वाच्यं
सर्गात्प्राग्जीवानां दुःखित्वासंभवेन दुःखनिवर्तनेच्छारूपकारुण्यस्यापि तस्मिन्नसंभवात् तस्मात् स्वयमचेतनापि प्रयोजनेनैव क्षीरादि
वत्प्रवर्तते इति सिद्धं ५७ ननु प्रयोजनमुद्दिश्य प्रवृत्तिर्दृष्टान्तस्यासास्तदस्ति तत्राह औत्सुक्येति औत्सुक्यमिच्छा यथेयं मया संभोक्तव्येति
तन्निवृत्त्यर्थं रसादिक्रियासु प्रवर्तते लौकिकः अनिवृत्ताया इच्छाया दुःखदत्वात् सा च विषयसिद्धावेव निवर्तते इति सैव फलं एवमव्यक्तं
प्रधानमपि पुरुषार्थो मया कर्तव्य इतीच्छायां पुरुषविमोक्षरूपफलाय प्रवर्तते तत्सिद्धिं विना तादृशेच्छाया अनिवृत्तेरनिवृत्तायाः स्वानि १३
ष्टत्वात् तथा च स्वार्थमुख्येनैव परार्थारम्भ इति न कोऽपि दोष इत्यास्तां विस्तरः ॥ ५८ ॥

ननु भवतु प्रकृतिर्निवृत्तिः कथं तया च पुरुषनिर्मोक्षः एवं स्यादत आह रंगस्येति रंगपदं स्थानिपरं तथा च यथा नर्त्तकी शृंगारादि
हावलीलाविलासवती विविधालंकारशोभिता नृत्यगीतादिभिः आत्मानं रंगस्य सभ्यादेर्दर्शयित्वा दृष्टाहमनेनेति कृतप्रयोज
ना पाश्चान्निवर्त्तते एवं प्रकृतिर्बुद्ध्यादिसुखदुःखातभावेनात्मानं पुरुषस्य प्रकाश्य त्वमन्योहमन्येति विवेकितां निवर्त्तते असंयुक्ताभ
वति तया निवृत्तौ केवलः पुरुषो मोक्षमधिगच्छति ५९ ननु परार्थं प्रत्युपकारसंबंधेन प्रवृत्तिर्दृश्यते नहि पुरुषात्कश्चित्प्रत्युपकारः प्र
कृतेरत आह नानाविधैरिति गुणवती प्रकृतिरत एवोपकारिणी गुणैः सः पुरुषस्य अगुणस्य साक्षित्वाभावकतया गुणातीतस्या
त एवानुपकारिण उपकारासमर्थस्य नानाविधैर्महदहंकारेंद्रियमनः प्रभृतिभिरूपायैरर्थं प्रयोजनं अपार्थकं स्वीयप्रयोजनशू
न्यमेव चरति आचरति स्वभावादयं गुणवतां यदनुपकारिणामप्युपकारकारणं अतः परार्थं प्रत्युपकारसंबंधेनैव प्रवृत्तिरिति
नानियमो व्यभिचारादिवसारतां विस्तरः ६० स्यादेतत् नर्त्तकी नृत्यं सभ्येभ्यो दर्शयित्वा धनप्राप्त्या निवृत्तापि पुनः कुतूहलात्प्रवर्त्तते य

रंगस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः ५९ नानाविधैरुपायैरु
पकारिण्यनुपकारिणः पुंसः गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ६० प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भ
वति या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ६१ तस्मान्न बध्यतेनापि मुच्यते नापि संसरति कश्चित् संसरति बध्यते मुच्यते
च नानाश्रया प्रकृतिः ६२

था तथा प्रकृतिरपि पुरुषाय आत्मानं दर्शयित्वा विवेकेन निवृत्तापि पुनः प्रवर्त्स्यतीत्यत आह प्रकृतेरिति सुकुमारतरं सलज्जं दृष्टा
स्मीति कृत्वा पुनः पुरुषस्य दर्शनं नोपैति दृष्टिविषया न भवति यथा कदाचित्कुलस्त्री युवती साध्वी अन्तरावस्थित पुरुषेण हसतिचा
गतेन दृष्टा सा व्रीडायमाना त्वरितमन्तः प्रविशति दृष्टाहमनेनेति एवमव्यवधानदर्शनमुपैति अन्यपुरुषस्य एवं प्रकृतिः परात्मना पु
रुषेण यदा ज्ञानचक्षुषा दृष्टा सा व्रीडायमाना कुलस्त्रीवत् पुनर्दर्शनं नोपैति पुरुषस्य विवेकख्यातिरेव तस्मादिति प्रतिबंधकत्वादि
ति भावः ६१ स्यादेतत् पुरुषश्चेदगुणोऽपरिणामी कथमस्य सुखदुःखादिरूपो बंधः अतो न मोक्षोपि मोक्षस्य बंधेन समानाधिकरणत्वात् त
स्मात्पुरुषविमोक्षार्थमिति रिक्तं वच इतीमामाशंकामुपसंहरन्व्याजेनाभ्युपगच्छन्नपाकरोति तस्मादिति वस्तुतोऽसंगत्वादेव पुरुषो
बंधमोक्षादिरहितः सिन्नतिरोधानं चोत्पत्तिर्न [illegible] तस्मात् [illegible] परमार्थतः तति श्रुतेरिति भावः कस्तर्हि बंधादि

नन्वपुरुषस्यापि प्रकृतिसंपर्कादारोपितसुखदुःखादिकं बंध इत्युक्तं स पुनः केन साधनेन बध्नाति मोचयति च तदाह रूपैरिति पुरुषार्थं प्र
भोगं प्रति आत्मना बुद्धिरूपेण आत्मानं पुरुषं रूपैः सप्तभिः धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यैः बध्नाति पुरुषार्थं स्वरूपावस्था
नलक्षणं मोक्षं प्रति एकेन रूपेण ज्ञानेन मोचयति संसारान्निवर्तयति एतेन वैराग्यापरसाधनाभावेपि ज्ञानं मोक्षस्य कारणं भवत्येवेति ज्ञा
पितं उक्तं च तथा वेदान्तेषु पूर्णबोधे तदन्यौ द्वौ प्रतिबन्धौ यदा तदा मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यतीति द्वौ वैराग्योपरमो दृ
ष्टदुःखं यथोचितव्यवहारक्लेशः तथा च विषयजिहासारूपवैराग्यस्य विषयदोषदर्शनजन्यस्य पुनर्भोगेच्छादीनतामात्रं फलं
न तु मोक्षोपि एवं ध्याननिरोधरूपोपरस्तस्यापि यमादिसाध्यस्य द्वैतादर्शनमेव फलं न मोक्षः श्रुतिषु ज्ञानैकलभ्यत्वकथनादित्या
तां विस्तरः ६३ भवतु ज्ञानादेव कैवल्यं तदेव तु कस्मात् किमाकारं च तदाह एवमिति उक्तप्रकारपुरुषगोचराभ्यासात् पुनः पुनः श्रवणम
ननान्निदिध्यासनात् केवले पुरुषमात्रगोचरं ज्ञानं साक्षात्कार उत्पद्यत इत्यर्थः एतेन निदिध्यासनसहकृतेन मननसेवासंगो

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ६३ एवं तत्त्वाभ्यासान्नास्मि न मे
नाहमित्यपरिशेषं अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानं ६४ तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां प्रकृतिं पश्यति पु
रुषः प्रेक्षकवदवस्थितः स्वस्थः ६५

चरनिर्विकल्पकसाक्षात्कारो भवति न श्रुतानुमानाभ्यां तयोस्तत्रासामर्थ्यादिति विबोधितं यथाह समानतंत्रे भगवान्पतंजलिः ऋतंभरा
तत्र प्रज्ञा श्रुतानुमानाभ्यामन्यविषया विशेषार्थत्वादिति आकारमाह नास्मीत्यादि नास्मीत्यस्य न कर्ताऽस्मीत्यर्थः तेन बुद्धिभिन्नोहमि
ति प्राप्तं न मे दुःखमिति शेषः तेन दुःखाद्यारोपाभावो लब्धः नाहमित्यनेन नाहंकारभेदग्रहः नास्ति परिशेषो यस्मादित्यपरिशेषं चरमं त
स्य सप्तधा प्रोतत्वमिति प्रवृत्तस्यादिनोपकारकत्वेन अविपर्ययात् व्यधिकरणप्रकाराभावाद्विशुद्धं प्रमात्मकं मिथ्याज्ञानवासनोन्मू
लनक्षमं एवंविधम् एकात्मसाक्षात्कारस्तत्त्वज्ञानपदेनोच्यत इति भावः ६४ तत्त्वज्ञानानंतरं पुरुषः किं करोति तदाह तेनेति तेन प्र
वीक्षणेन ज्ञानेन निवृत्तप्रसवां प्रसवानोगमेदसाक्षात्काराद्यः तेषां जनितत्वात् निवृत्तां प्रकृतिं पश्यति पुरुषः प्रेक्षकवदव
स्थितः स्वस्थः यथा कश्चित्प्रेक्षको रंगस्थां गीतनृत्यादिषु विरतां नर्तकीं स्वस्थो निर्विकल्पो निराकुलः पश्यति एवं पुरुषो बोधितासु
तासु योग्यव्यवस्थासु वर्तमानो प्रकृतिं पश्यति इयं प्रकृतिः स्वगुणैः पुरुषान् बध्नाति विमोचयति च ॥६५॥ ॥ ॥ ॥ १४ २

ननु नित्ययोः प्रकृतिपुरुषयोः संयोगसत्वात्कथं तस्याः प्रसवनिवृत्तिरित्तत्राह दृष्टामयेति तयोः संयोगेपि सर्गस्य जनने प्रयोजने प्रयुज्य
ते तेनैवेति पुरुषत्यासहकारिकारणनास्तीति तयोर्मध्येअन्या प्रकृतिः उपरमति प्रसवतेऽस्यन्वयः तत्कथं नास्ति तत्राह दृष्टा मयेति तयो
र्मध्ये एकः पुरुषः स्वामित्वेनस्वरूपकोहं जातीयेवं गुणप्रकृतिर्मया दृष्टत्युपेक्षकः स्वत्युपरमतेत तद्वेगाद्यावेशरहितो भवति यथा
नर्तकीदृष्टासभ्यः तयाच प्रसवेपुरुषस्य प्रकृतिर्भेदाग्रहः सहकारिदर्शने सतितु सनास्तीतिभावः ६६ नवभिद्यते हृदयग्रंथिः छिद्यं
ते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुत्या तत्वज्ञानानंतरमेव मोक्षे सर्वकर्मक्षयेण देहाद्यभावस्यात्
कथं प्रकृतिदर्शनं ज्ञाने देहस्य हेतुत्वात्तत्राह सम्यगिति सम्यक्ज्ञानं मिथ्याज्ञानेच्छ देहेभ्यं ज्ञानं तदधिगमात् तदुत्पत्तेर्धर्मादीनां
देहारंभकान्यधर्मादीनां संचितक्रियमाणानां दग्धबीजभावानां अकारणत्वाप्रमेस्वफलोत्पादनासामर्थ्ये तस्योत्पत्तिप्रमाणाद्धिवी

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या सतिसंयोगेपितयोः प्रयोजनं नास्ति सर्गस्य ६६ सम्यक्ज्ञानाधिगमाद्धर्मा
दीनामकारणप्राप्तौ तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ६७ प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ
ऐकांतिकमात्यंतिकमुभयं कैवल्यमाप्नोति ६८॥

तत् विवेकेन प्राप्तो संस्कारो देहारंभकादृष्टं तद्वशात् धृतशरीरस्तिष्ठति यथा कुलालव्यापारविगमेपि वेगवशाच्चक्रं भ्रमति तिष्ठति
प्रारब्धस्य भोगैकनाश्यत्वात् अतएव तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इत्युक्तं श्रुतौ भोगेन त्वितरे क्षपयित्वेति वेदांतेषु
भगवताव्यासेन च तथा च तत्वज्ञाने सत्यपि कर्मक्षय इत्यस्य प्रथमतत्वज्ञानप्रागभावस्यानष्टत्वात् फलानुत्पादमात्रमर्थोनदेहा
द्यभावोपीति संक्षेपः ६७ ननु यद्युत्पन्ने तत्वज्ञानेपि तिष्ठतीति कदा तर्हि मोक्षं गच्छतीत्यत्राह प्राप्तेति भोगेन प्रारब्धक्षये ततः शरीरस्य
भेदो विनाशस्तस्मिन् प्राप्ते सति चरितार्थत्वात् बुद्ध्यादिद्वारा कृतकृतभोगापवर्गलक्षणप्रयोजनत्वात् प्रधानस्य पुरुषं प्रति
विनिवृत्तौ संयोगाभावलक्षणलये उभयं उभयगुणकं कैवल्यं दुःखविनाशं प्राप्नोति उभयं किं तदाह ऐकांतिकमवश्यंभावि आ
त्यंतिकं पुनर्दुःखजातीयानुत्पत्तिविशिष्टं एतद्विशेषणकत्वात् कैवल्यमुभयं उत्पन्नात्मसाक्षात्कारवान् पुरुषः प्रक्षीणाशे
षकल्मषः भोगेन प्रारब्धक्षये सत्यवश्यमात्यंतिकं दुःखविनाशं प्राप्नोतीति समुदायार्थः ॥६८॥ ॥ ॥ ॥

प्रेक्षावोधप्रयासार्थमाह पुरूषार्थमिति पुरूषस्यार्थः प्रयोजनं मोक्षाख्यं यस्मात्तादृशं ज्ञानं गुह्यं रहस्यं दुरवबोधं परमर्षिणा क
पिलेन कथितं यत्रेति निमित्तसप्तमी यज्ज्ञाननिमित्तमित्यर्थः ६९ एतद्भगवता तत्त्वज्ञानमुक्तं तस्य कृतआगमस्तत्राह एतदि
ति पवित्रपावनं सर्वपापनाशकत्वात् अग्र्यं सर्वेभ्यः पवित्रेभ्यो मुख्यं मुनिः कपिलः आसुरयेऽनुकंपया प्रददौ कथितवान्सोपुनः
पंचशिखाय आख्यातवान् तेन च बहुधा शिष्योपदेशद्वारा प्रकाशितमित्यर्थः ७० इश्वरकृष्णेन किं ततः साक्षात्प्राप्तं तत्राह शि
ष्यपरंपरयेति आर्याख्यछंदो विशेषैस्तत्संक्षिप्तं यद्यमया कार्येत्युच्यते अतउक्तमार्याभिरिति किं कृत्वा सम्यक् अध्ययनभाव

पुरुषार्थं ज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं स्थित्युत्पत्तिप्रलयाश्चिंत्यंते यत्र भूतानां ६९ एतत्पवि
त्रमग्र्यं मुनिरासुरयेनुकंपया प्रददौ आसुरिरपि पंचशिखाय तेन च बहुधा कृतं तंत्रं ७० शिष्यपरंपरया
गतमीश्वरकृष्णेन चैतदार्याभिः संक्षिप्तमार्यमतिना सम्यक् विज्ञाय सिद्धांतं ७१ सप्तत्यां किल येऽर्थास्तेऽर्थाः कृ
त्स्नस्य षष्टितंत्रस्य आख्यायिका विरहिताः परवादविवर्जिताश्चापि ७२ इति सांख्यकारिका ग्रंथः ॥ ॥

नात्सिद्धांतं विज्ञाय ७१ एतच्छास्त्रस्य सूचनारूपत्वेन तु प्रकरणमित्याह सप्तत्यामिति षष्टितंत्रस्य पुरुषप्रकृत्यादिष
ष्टिपदार्थप्रतिपादकतंत्रस्य येर्थास्तेर्थाः किल सप्तत्यां कारिकासप्तत्यां कथिताः किंभूता आख्यायिका विरहिताः कथाक
थितदृष्टांतादिरहिताः तथा परवादविवर्जिता अपि षट्दर्शनोत्थापनरहिता अपि सर्वाः तत्र अयमपि कापिलोक्त षडध्याय्यां चतुर्थे
ध्याये आख्यायिका पंचमे परवादस्तथा च न वर्तते इति भावः षष्टिपदार्थगणितान्यंतरे यथा पुरुषः प्रकृतिर्बुद्धिरहंकारो
गुणास्त्रयः तन्मात्रमिंद्रियं भूतं मौलिकार्थाः स्मृता दश विपर्ययः पंचविधस्तथोक्ता नव तुष्टयः करणानामसामर्थ्यमष्टाविं
शतिधा मतं इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिरिति तथा चात्रैतत् षष्टिपदार्थविवेचनान्नेदं प्रकरणं किंतु तं
त्रमेवेति सिद्धं ७२ ॥ इति श्रीरामगोविंदतीर्थशिष्यनारायणतीर्थकृता सांख्यचंद्रिका समाप्ता शुभं भूयात्